निविक्तिस्तुकुलाभावनेत्याकारकोऽन्वयबोधः फलभावनयो धात्वर्थत्वादितिभावः लाघवादिति
आश्रयत्वस्वरूपसंबंधविशेषः स चाश्रयभेदेन निरूपकभेदेनवानानेति बहूनां शक्यतावच्छेदकत्व
मपेक्ष्यपतत्वजातेरेकस्य तथात्वेलाघवं एवंजात्यादेरुपाध्यतिरिक्तपदार्थानां स्वरूपतो भानानभ्युप
गमेनाश्रयत्वानामाश्रयत्वेनावच्छेदकत्वं वाच्यं कृतित्वजातेस्तु धर्मितानवच्छिन्नपदावच्छेदकभावोजा
तेरनवच्छिन्नभानस्य सर्वसिद्धत्वादिति परत्वलाघवं ताश्राश्रयत्वानामवच्छेदकत्वेवहूनां स्वरूपसंबंधः सं
सर्गाविषयतावच्छेदकाः कृतित्वस्य तु अवच्छेदकताया समवायपदकल्पने लाघवं इदमुपलक्षणं प्रत्यवनीयादेः।

मह्ना
प्रभा
प्रा०
४

कृत्यर्थकत्वेन उक्तं स्ववर्थे तिङः यान्वयस्यादृष्टचरत्वेन लङर्थवर्त्तमानत्वादेः कृतावन्वयानुपपत्तेः तत्र धात्वर्थपा
काद्यो लङर्थवर्त्तमानत्वाद्यन्वयोः न कृतावनन्वये त्वति विरहाद् इति वाच्यं धात्वर्थान्वितस्वार्थकत्वेन तद्यामेव तिङा
देः स्वोपस्थाप्यकालान्वयानुभावकत्वस्य मते तत्र न्यायादेवतादात्म्यान्वयसंभवेन वर्त्तमानत्वेऽपाकः कृतिमान् इत्या
दिबोधस्य पदस्थाने मा विभूत पाकः कृतिमान् अपि चैवं तदीयत्व नित्यैवं न स्यादिवाक्यातोऽपि स्यात् तस्यानुप्रक्रमस्यार्थे तिङाद्यैः
स्वार्थकालाद्यनुभावकत्वस्य स्वपरामेपि पाकः निष्पत्तरपि वर्त्तमानेपाके पचतीति प्रयोगस्य प्रामाण्ये प
र्य्यन्तकम्मस्याने नापि कर्त्तव्यस्य तेन नैवं तदर्थस्य वर्त्तमानत्वादेरन्वयः तृतीयानुपपत्तेश्च विशेषणविभक्तिवत्पद
साधुत्वमात्रार्थकत्व विवक्षितेन ल्युडादिना स्वार्थकत्वं धात्वर्थांशे विशेष्यतयानुभावकत्वेन कर्मादि विवक्षितेन तृतीया वि
शेषणतया चैत्रः कृतिमत्पाककर्मतान्नमित्यादौ तदन्तस्य पाकाद्यकर्मकबोधस्य चैत्रेण पच्यते ओदनः इत्यादिवाक्या
दुत्पत्तेस्तृतीयोत्वस्य प्रामाणिकत्वाद् इत्यादि इत्याहुः तदयुक्तं स्ववर्थे तिङर्थान्वये बाधकाभावेन तृतीयायाः अनुशासनबो
धितकर्तृत्वार्थकतायाः कर्मादिनिर्णय प्रत्ययात् तद्बोधितत्वार्थकताकल्पनेच मानाभावात् कर्तृतायाः तृतीया
र्थत्वस्य दीधितिकृदुक्तस्यैव युक्तत्वात् इदं तत्त्वं कृतित्वं यत्नत्वं प्रकृतिनिर्जीवनयोनीनां सामान्यमेव कर्त्तृ
त्वादिशक्यतावच्छेदकं ननु तद्व्यन्तरं प्रवृत्तित्वं चेष्टानिः श्वसितादौ निः श्वासादौ कृतिकृतिमत्त्वे बोधस्य
जीवनयोनिलिङ्गयुक्तत्येव प्रामाण्यसंभवात् पचतीत्यादितः पाककृतिमान् इत्याद्याकारकस्यैव बो
धस्यानुभाविकत्वाच्च प्रवृत्तित्वमेव प्रकृतित्वमिति तु न शक्यते वक्तुं निवर्त्तते इत्यत्रैव प्रवर्त्तते इत्यत्रापि प्रवृ
त्तौ कर्तृत्वे [illegible] विषयत्वेन [illegible] अनुमति कृतनयानयो [illegible] शाकत्वादृश [illegible] प्रवृत्तित्वस्य

प्रतीति

गप

तत्प्रातिपदिकोत्तरं प्रथमा यस्य तत्प्रातिपदिकस्यार्थोऽधानतत्तरप्रत्ययोपात्तैकत्वविशेषणतयान्वेति
तदुत्तरेतरतीयेत्यभिहितानभिहितत्वनिवेशनविभक्तित्वावच्छिन्नकर्माख्यातैकत्ववाचकपदोत्तरप्रथमैव
कर्माख्याततार्थेतृतीयेतिनियमउपपद्यतेग्रामंगन्तव्यानदेवदत्तेनत्यादौकर्तृः प्रत्ययार्थैकत्वस्यापि
स्यविशेषणत्वेदेवदत्तादिप्रातिपदिकार्थेऽपितत्रतत्तृतीयाप्रसंगात्तुपपत्तिः कर्मेत्यादावपेवैतिस्यापत्ते
तत्प्रातिपदिकार्थेतिरः अर्थः कर्तृविशेषणत्वेनान्वेतितदुत्तरप्रथमामस्यतत्वैविशेष्यतयान्वेतितदुत्तरेतरतीयेति
स्वपोऽवश्याऽनियमतायकर्तृणाख्यातवाच्यत्वमकामेनापिवाच्यमित्यपिप्रत्यक्षेदर्शनतरीयेवअवश्यानिवोह्यरि
तिवदेति वये तत्सूत्रप्रोक्तत्वैकरणपदेकर्तृत्वेनकरणत्वोपायिपदेतथावानभिहितयोः कर्तृत्वकरणत्वयोरितिमार्थेपृति
त्वेवः पचतीत्यादैतृतीयाप्रसक्तिराश्रयत्वप्रतियोगित्वाद्यात्मकस्यभावैकत्वस्यापूपादानात्तानानिनश्रयत्वादिप्रे
गोपितत्रापत्तिः ग्रामंगन्तव्यानदेवदत्तोघटंज्ञातवानघटोनदृष्टवानित्यादौप्रत्यये: क्तादिसदाश्रयप्रतियोगित्वादिषुकर्तृ
त्वकेषुक्तस्याश्रयत्वप्रतियोगित्वादिकंकर्तृत्वमप्यभिहितमेवविशिष्टवाचकस्यविशेषणवाचकत्वेनियमादितित
कुत्राप्यतिप्रसंगः एवंचकर्तृसंख्याऽऽख्यातमनभिहितानाभिमित्यपास्तंतार्थघटनेनादरणीयमितितत्रप्रयुक्तंगौरवमपि
पादृतं पत्तेतोकर्तृत्वाख्यातसामान्यस्यतदेकदेशेववचनस्याश्रयाख्यातकत्वेमानाभावः एकत्वादिविषयेष्वे
कवचनादयइति प्रातिपदिकान्तुशिष्टार्थस्याख्यातस्यकर्मभिधायकतात्यागवत्यागसंभवादिप्रकृतावपिनक्षतिः
वेरेणपक्षेमित्याद्यविवक्षेवेरेणपक्षनइत्यादावपितृतीयापयेवकर्तृत्वमप्रत्याभावेननत्वनिरूपितोपस्थितेपत्वर्थ
विशेष्यत्वविषयमतिहित्वमिदयानेदीपितिकारैरप्युक्तंतोपमर्दः नित्यं कैश्चित्तुवेरेणपक्षनइत्यादोतृतीयापा:

महा
प्रभा
४१प्र·

17

पचतीत्यादेरपि प्रामाण्यं स्यादिति चेन्न तिङ्र्थैकत्वेनावच्छेदकतासंसर्गेणोपस्थितिपरिकार्यभानं न तु समवाये
नेति व्युत्पत्तिस्वीकारात् अत्र बहुवचनं चैत्र इत्येयमन्यथा चैत्रादेः पाचीवहति तथा चैत्रः पचतीत्यादेः प्रामाण्यं जीवः पचत्य
त्यापचतीत्यादेः प्रामाण्यं च प्रसज्येत न चावच्छेदकतायाः संसर्गत्वे तु लः पचतीत्यादेरपि प्रामाण्यमापद्येते
ति वाच्यमिष्टत्वात् यद्वितेनैतेन दात्वं त्वाव पविष्टतीति नैवावच्छेदकत्वेन संसर्गेणान्तिङर्थैकत्वे तेनैव व्युत्पादनी
यः नन्वयत्वाविशिष्टमन्तु क्तुं तथा तदर्थैकत्वे संसर्गः समवायकृतेः प्रातिपदिकार्थैः ति नेतु व्यः पचतीत्यादेः
प्रामाण्यमित्युक्तिस्तु न युक्ता जीवः पचत्यात्मा पचतीत्यादेरपि प्रामाण्यप्रसंगात् स्यादेतत् प्रमेयत्वादिना वह्नि
नैव चैत्रादीनां कर्तृत्वादिकमनुभावयन्नप्रमेयं पचतीत्यादिवाक्यमपि प्रमाणं स्यात् न च विशेष्यतावच्छे
दकावच्छेदेनैव तिङर्थैकत्वेनान्वय इति व्युत्पत्तेः स्वीकारान्नयानेयमापत्तिः प्रमेयत्वावच्छेदेन पाककृत्याश्रयत्वा
दिति वाच्यं तथा सति पुरुषः पचतीत्यादेः पचतीत्यादेरप्रामाण्यप्रसंगात् पुरुषत्वस्य प्रामाण्यतावच्छेदेन
पाककृत्याश्रयत्वात् उच्यते आनुपूर्वीभेदेन कार्यकारणभावभेदाद्वैत्र पुरुषादिपदघटितानुपूर्वीज्ञानस्यैव
चैत्र पुरुषादिपदघटितानुपूर्वीज्ञानत्वैव चैत्र पुरुषादिविशेष्यकतादृशशाब्दप्रतिकारणतात्वकल्पनेन कार्योत्पत्तेः
सिद्धत्वात् प्रमेयादिपदघटितानुपूर्वीज्ञानस्य तु प्रमेयत्वाद्यवच्छिन्नविशेष्यकतादृशशाब्दनिष्प्रकारकबोधं
प्रतिकारणतात्वादृशबोधात्मककार्यस्यासिद्धत्वेन तत्कल्पनादित्यप्रामाण्यकविरहात्तादृशपचतीत्यापत्तिः
किंच तादृशवाक्यस्य कार्याप्रयोगात्कथमप्रामाण्यमापादनीयं न चापादकमहावाक्यतत्कल्पनादृशवाक्य
तस्वाक्यस्य प्रामाण्यमापादयितुं शक्यं तस्मात्तादृशार्थज्ञानस्य विरहेणतद्धेतुघटितसामग्रीविरहादेवापा

पूपवत ३

नित्यकृतौ वा धादौ ईश्वरः करोतीत्यादेरप्रामाण्यापत्तेः एतेन करोतेः शक्यतावच्छेदकप्रकृतित्वमेव स्वभुक्तोऽजीव
नयोनियत्नमते पि न च करोति व्यवहाराभावादिति परास्तं ईश्वरः करोतीत्यप्रामाण्यप्रसंगात स्वप्रमाः
व पि स्वापं करोति निःश्वासं करोतीत्यादिव्यवहारस्तेनैव दर्शितः प्रत्युत तस्यानादः एतेन राघोगह्वतीत्या
दाविव चेष्टो निःश्वसितीत्यादावप्याश्रयतात्मकं भात्मेव करोतेर्थो निरूढो लिति प्रकृतित्वस्य शक्यतावच्छेद
कत्वोपगमेऽपि न क्षतिरित्यपि प्रत्युक्तं प्रकृतित्वस्य चेष्टजनककृतिनायामनामनस्तायां वावच्छेदकत्वप्रामाणाधी
नायामेव कृतावनुगतानुभवेन वासिद्धत्वानिरूढत्वाभाववत्त्वे नेश्वरः करोतीत्यादेरप्रामाण्यप्रसंगाच्च नच
पाकविषयककृत्यबाधेनेन कोऽवरनिर्वृत्तिमत्त्वविशिष्टकृतिषयवतीति प्रयोगस्य योग्यत्वापत्तिरिति वाच्यं अनुकू
लतासंसर्गेण धात्वर्थस्य कृतावन्वयोपगमेन निर्वृत्तेः पाकानुकूलत्वघटितायत्नसंभवात् अत एव सम
र्थस्य गन्त्यादिगोचरप्रवृत्तिमत्त्वेऽपि नागच्छतीत्यादिकतत्प्रयोगो योग्यस्तत्प्रवृत्तौ फलोपधायकत्वानु
कूलतासत्त्वादत एव चैतन्तोऽलसः क्रियमाणो वरप्रवृत्तिरशापायचतीत्यादिको न प्रयोगस्तत्प्रवृत्तेर्गन्तव्यासिद्धत
यापाकप्रयत्नस्यानुकूलताविरहात् अत एव तत्कालीनत्वपाककृतिमात्रप्रापितत्वप्रयोगस्तत्राविनाहेशात
कूलत्वाबाधादेतेन न करोतीति निष्पत्तीति निर्यासिकायाः साध्यताविषयतायाः संसर्गतोपगमान्न निर्वृति
मादाया निष्पत्तिसंगो निर्वृत्तेर्भावदशाविषयताविशेषविरहान्न्याते ऽलक्षणादिगोचरप्रवृत्तिदशायां पचतीत्या
दिप्रयोगप्रसंगाभावात् प्रयुक्तेर्भावदशाविषयताविशेषस्य धात्वर्थपाकादावभावादित्यक्तिः प्रयुक्ताने ऽलक्ष
यादिकालीनपाकादिगोचरप्रवृत्तिमादाया निष्पत्तिसंगस्य दुर्वारत्वात् निष्पत्तिकृतौ पाकानुकूलत्वबाधेनेश्वरः

महा
प्रभा
पु
४२

18

तेऽोदनःस्मारावच्छेदनादौ तादृशसंसर्गान्वययोग्यतापतिरतः स्वनिरूपकबोधविशिष्टायाः कर्मत्वादिविषो
ष्यतानिरूपितप्रकारताया वाक्योच्चारणकालावच्छेदेन विरुद्धोक्तिमलाभायः सर्वप्रत्नेऽोदनःस्मारावोदनासावच्छ
वायोबोधानर्हत्वं तादृशविशिष्टप्रकारतामात्रात् तादृशविशेषणतयातात्पर्यविषयत्वस्य स्वनिरूपकतात्
पर्यवसितविशिष्टतादृशविशेषणताविच्छिन्नविषयताविरहरूपत्वेऽपि सततनिवेशेन तद्दर्शितदोषाद्यसंभवेऽपि कर्मत्वा
दीनामेव पर्य तादृशसंसर्गाभिधानयोग्यत्वस्यापि विशेषणत्वेन तादृश्य विषयत्वात् प्रकृतकर्मत्वादीनामुपादाने
वर्तमानरूपणाग्रासङ्गेन तत्परिष्करणपरिष्कारोऽपीति कर्मत्वादीनामपीति इत्येवमभिव्यक्तिमनपेक्षत्वात् विशेषण
तयातात्पर्यविषयत्वस्यैवाऽष्टत्वात् वस्तुतस्तु स्वर्गकामो यजेतेत्यादिना लिङर्थेऽपि विशेषणतापन्नस्वर्गकामा
दिपदार्थसंसर्गान्वयबोधानुभविकत्वात् स्वर्गकामादेः प्रथमान्तोपस्थाप्यस्य संग्रहाय नेत्यत इति कृतीतरार्थकं कर्मत्वा
दीत्यस्य विवरणमतएवार्थेऽतिसंगच्छते नचैवं कर्त्रविदितत्तृतीयादेः कृत्यर्थकतायामप्युपस्थापितत्वेन च्युत्पत्त्ये
नात्समानार्थकप्रथमान्तोपस्थाप्यसंसर्गान्वययोग्यतापातिरिति वाच्यं तादृशान्तोपस्थाप्यत्वेन च कृतेर्विशेषणीभूता
तया वाचामन्तेनोपस्थितिश्रुयोग्यकृतिहृतिविशेष्यता निरूपितविशेषणतयातात्पर्यविषयत्वमर्थः फलितत्वेन
सद्रूपस्याप्यायाश्चापि कृतेर्लिङर्थस्याख्याततान्तोपस्थितिदर्शितदोषनिरासः अतएव लिङर्थे तत्त्वविशेषणेन
तादृशसंसर्गान्वययोग्यतायां तेनैव तादृशविशेष्यत्वं च कर्मान्वयस्थले साक्षात्तादृशपदविशेषणतानिरूपि
तं कर्मान्वयस्थले तत्पूर्वत्वादिनाऽन्यत्र विशेष्यभावनाविशेष्यफलविशेष्यतावाधारकं चैत्रेण पच्यते ओदनः
इत्यादौ च समवेतकृतिजन्यभावनाजन्यफलाश्रयतारोदनादौ बोधान्वयभावनादौ तादृशविशेष्यतानपाया

दकासंपत्तेः न च तात्पर्यभ्रमस्य संभवेन ततोपि शाब्दबोधसंभवात् कार्यकारणभावस्यावश्यकत्वमिति तद्वि
नासामग्र्या आपादिकानुपपत्तावतस्य तु एवं ज्ञानत्वेन तादृशशाब्दं प्रति कारणताकल्पनमावश्यकमिति नाकां
क्षाज्ञानं विना तादृशशाब्दसामग्र्याः संपत्तिरिति वाच्यं तादृशवाक्यात्तादृशशाब्दबोधस्यैव विरहस्य तथात्वात्तादृशशाब्दभ्रम
जनकदोषासंपत्तेरिति किन्तु निष्कर्षेण कर्तृकर्मणोराख्यातवाच्यत्वे स्ववाच्येनाख्यातसमानार्थे संख्यान्वयबोध
कत्वमिति नियमविनिगमनाविरहात् संख्यान्वयबोधानुपपत्ते कृत्यादेस्तदर्थत्वे तु न तथा नियमविनिगमकाक्षा ।
त्यादेः संख्यान्वयस्याभिहितत्वात्तदाश्रयस्यावाच्यतयाः संख्यान्वयविशेष्यत्वस्य स्थितत्वाद्दर्शितं सिद्धं ततोनोपप
द्यते श्रुतिवैयाकरणानां प्रतिहितम् संख्याभिधानेनैव स्यादित्यत आह संख्याभिधानेति संख्याभिधानयोग्यः आख्या
तोपस्थाप्यसंख्याप्रकारतानिरूपितशाब्दविशेष्यताश्रयः आत्मपदानुशासनेन कर्मतादर्थकप्रत्ययसमानपदोप
स्थाप्यस्वार्थस्याय कर्मत्वाद्यनवरुद्धेति तदर्थश्च कर्मत्वाद्यप्रतियोगिविशेषणतानापन्नः उक्तरीत्यैव कर्तृत्वा
देरपि प्रथमार्थतासंभवादादिपदेन तत्संग्रहाय पदेनपदार्थेनोद्देश्यतादात्म्येनादौ कर्मत्वाख्यातार्थसंख्यान्व
याद्युपपत्तिः कर्मत्वाद्यन्वितत्वात्मकस्य कर्मत्वाद्यवरुद्धत्वस्य तस्य समत्वादाख्यातोपस्थाप्यस्य पाककर्मत्व
स्य विशेषण तथा तदन्वयादिति निरुक्तकर्मत्वाद्यविशेषणतात्मकस्य कर्मत्वाद्यनवरुद्धत्वस्य तथात्वानुपपत्ते
तेः ननु विशेषणतानापन्नत्वप्रकारता विरहः स च विषयताया ज्ञानासमानकालीनत्वपदेनैवोपस्थितीत्यादौ
कदाचित्कर्मत्वादिविशेषणतापन्नैवेत्यादौ कालोपितत्त्वेति चेत् प्रतीत्यादावपि तैरुक्तदाख्यातार्थसंख्यान्वययो
ग्यत्वापत्तिर्ज्ञानसमानकालीनत्वविषयतेति पदेनाकालत्वावच्छेदेनोद्देश्यतादृशविशेषणतानावरुद्धत्वस्य च

मङ्गा
प्रमा
४३ प्रा
19

न्वयानुपपत्तेरिति चेन्न ग्राह्याविशेष्यत्वघातावच्छेदविषयताविरहविशिष्टाया इतरविशेषणत्वघातावच्छेदविषयता
तद्भावस्य निवेशनीयत्वात् चैत्रश्चैत्रं पश्यति चैत्रं पश्यतीत्यत्र हि भ्रचैत्रादेर्विशेषणत्वेनैव तु ग्राह्याविशेष्यत्वघापिता
वच्छेदविषयताविशिष्टविरहो व्याहतत्वनातिप्रसङ्गः अत एव विधुरिव विधुर्भातीत्यादावन्वयेपि नातिप्रसङ्गः सादृश्यप्रत्यक्षो वि
शेषणत्वघातावच्छेदविषये विधुरादौ ग्राह्याविशेष्यत्वान्वयानुपपत्तिः सादृश्यस्य तत्त्वप्रसुप्रभेदांशभेदस्यैव गगनत्वादिन
मेव वा भासमानत्वमित्यन्यदेतत् इत्यपि समादेः प्रत्युत ग्राह्याविशेष्यत्वघापितावच्छेदविषयतासत्वेन विशिष्टविरहाव्याहतेः
एवं चैत्र इव मैत्रो गच्छतीत्यादौ यद्यपि चैत्रादेर्विशेषणत्वघातावच्छेदविषयत्वं तदा चैत्रादेर्विशिष्टस्य ग्राह्याविशेष्यत्वपर्याप्तिः न च शा
ब्दबोधे तात्पर्यज्ञानस्य कारणत्वघाविशेषणत्वघाचैत्रादौ वक्तृतात्पर्यविरहात् शाब्दबोधानुपपत्तेर्न तद्व्यावृत्तिः तात्पर्यस्यावश्यकत्वेन
घावत्तत्तदंशे निरालात्पर्यकत्वाच्छाब्दबोधकस्य सिद्धान्तातिप्रसङ्ग इति वाच्यं नानार्थस्थल एव वाक्यान्तरबोधवारणाय तात्पर्य
ज्ञानस्य कारणताकल्पनात् इतरत्र तस्य कारणत्वे मानाभावात् इतरस्य शाब्दापत्तिवारणाय विशेषणत्वमात्रप्रयोजक
प्रथमान्तपदानुपस्थाप्यत्वं प्रथमदलार्थो वाच्य इति वदन्ति तन्न तादृशे तात्पर्यज्ञानस्य कारणत्वपक्षेपि वक्तृतात्पर्य
स्यावश्यकत्वात् तत्तदर्थबोधेच्छाविनाशाच्छब्दोच्चारणेच्छोदयासम्भवेन तस्य तात्पर्यस्य तदनुपपत्तेः प्रायेणांशेऽपि फलेच्छायाः
कारणत्वात् शुकादौ तु तद्वाक्ये ब्रुवतस्तात्पर्यविरहेपि शिक्षयितृशिष्टपितुः शुकविदीश्वरस्य तात्पर्यं वर्तत एव
ति वक्ष्यमाणत्वात् तत्र तत्रातिप्रसङ्ग इति किञ्च सहृदयचैत्र इव मैत्रो गच्छतीत्यादौ सदृशाभिन्नश्चैत्र इत्यवान्तरवाक्यार्थ
बोधनिरूपितग्राह्याविशेष्यताया अपि प्रयोजकत्वस्य प्रथमान्तचैत्रादिपदे सत्त्वेन विशेषणत्वमात्रप्रयोजकप्र
थमान्तपदानुपस्थाप्यत्वस्य चैत्रादावबाधेनातिप्रसङ्गाद्दुष्टीनः प्रथमदलार्थोपि न साधीयान् तत्त्वनिरूपकता

इतिप्रसंगात्तिवाक्यंप्रथमांतोपस्थाप्यताया अपिनिवेशनीयतयारितिमणिकारोक्तमुपेक्षितंदर्शितस्थलेस्वर्गं।
कामादेर्यत्नविशेष्यताविरहेणासंग्रहादितिपरमार्थः विवरणप्रयोजनंदर्शयतितेनेति यथाश्रुतार्थस्यायोगेनेत्य
र्थः नचैवंसंख्यान्वयः तिप्रथमांतोपस्थाप्यत्वेपिसाहचर्यांशोविशेषणतयावद्भिर्भावादितिभावः नचस्वरूपकवो नि३
यविशिष्टेनरविशेषणतानिरहस्यशाब्दबोधस्वेदतावच्छेदस्यनिवेशोपिवैयर्थ्यमाहस्वपमित्यवांतरवाक्यार्थबो
धीयतादृशविषयतासत्वेनतादृशाभावस्यमहावाक्यार्थबोधानहर्त्वेमसत्वाद्वैसंख्यान्वयापत्तिर्नोवतरतीति।
तात्पर्यपर्यंतनिवेशास्यनेदंप्रयोजनंसंभवतीतिवाच्यं एवंलेकपोतन्यायेनशाब्दबोधेऽवांतरवाक्यार्थबोध।
स्यपूर्वमनपेक्षितत्वेनतादृशसंख्यान्वयापत्तिवारणायतात्पर्यपर्यंतनिवेशानुचित्यमतात्पर्योक्त एतेनैवेदंःप
चतितेंडुलःइत्यादिवाक्यंपरिमाणांकंतदानयनतेंडुलेसंख्यान्वयवारणायद्वितीयदलेलादतिकान्यतेवप्रथमा।
विशिष्टतामलंप्रथमदलप्रवेशोनेत्यपिप्रत्युक्तं चैत्रश्चमैत्रोगच्छतीत्यादिनिवेशाद्वैसंख्यान्वयबोधापत्तिवारणाय
दर्शितार्थककट्यादानावश्यकत्वात् प्रथचैत्रमैत्रगच्छतीत्यादौचैत्रप्रथमांतपदोपस्थाप्यपित्वादृशसंख्यान्व।
यानुपपत्तिः कर्मत्वावच्छेदत्वात् नवप्रथमांतपदजन्योपस्थितिप्रयोज्यत्वविशेषणतयातात्पर्यविषयतावि
रहवतप्रथमांतपदोपस्थाप्यत्वसमुदितार्थः दर्शितस्थलेनककर्मत्वांशोविशेषणताद्वितीयपदजन्योपस्थिति न४
प्रयोज्यत्वानतप्रथमांतपदजन्योपस्थितिप्रयोज्येतितच्चैत्रादेः संग्रहः चैत्रश्चमैत्रोगच्छतीत्यादौनिवायसाहचर्यांशो
चैत्रादेर्विशेषणताप्रथमांततैत्रादिपदजन्योपस्थितिप्रयोज्यैवेतिनातिप्रसंगइतिवाच्यं तथासत्यपिचैत्रएवपचति
तंडुलपचपचतेइत्यादावेवकारार्थान्ययोगव्यवच्छेदकान्यत्वादेविशेषणतयातात्पर्यविषयचैत्रादेतादृशसंख्या

मदा
प्रभा
शृं
५८

वच्छिन्नविरहत्वप्रकारतानिरूपितानुकूलत्वसंसर्गावच्छिन्नव्यापारत्वनिष्ठप्रकारतानिरूपितावच्छेदकतासंसर्गावच्छि
न्नफलनिष्ठावच्छिन्नप्रकारतानिरूपितैकत्वं चैत्रत्वोभयावच्छिन्नमुख्यविशेष्यतानिरूपकशाब्दत्वावच्छिन्नं प्रतिप्रत्यव
हितोत्तरत्वसंसर्गेण चैत्रपदविशिष्टप्रथमैकवचनविशिष्टपचविशिष्टतिविशिष्टतंडुलपदविशिष्टमत्वात्मकविशिष्टानु
पूर्वीप्रकारकनिश्चयत्वेन कारणता तंडुलं पचति विक्लित्त्यनुकूलव्यापारानुकूलकृतिमांश्चैत्र इति बोधस्थले चैत्रः पच
ति तंडुलमिति मदुक्तवाक्याज्जन्यते नैककर्तृत्वादिनिशेषितभावनादिविषयताकबोधत्वं नाद्यशाब्दत्वानुपूर्वीज्ञानकार्यता
वच्छेदकं नाद्यवाक्याद्यशाब्दविषयताकबोधानुत्पत्तेरेवं चैत्रः पचति तंडुलमित्यादिकर्मत्वलाद्यर्थकप्रत्ययघटिता
नुपूर्वीप्रकारकनिश्चयस्यापि जन्यतावच्छेदकं दर्शितविधविषयताकशाब्दत्वमेव नत्वेकत्वादिविशेषिततंडुलादिवि
षयताघटितं चैत्रः पचति तंडुलमित्यादौ द्वितीयैकवचनादिवत् तंडुलमित्यादावपि प्रथमैकवचनादेकत्वभानमपरिहार्यं
न त्वापिततद्द्वितीयैकत्वविषयतानामप्यनेकवचनाधीनोपस्थितिप्रयोज्यानवच्छिन्नसंसर्गतानवच्छिन्नविषयताया अनुप
पत्तेस्त्वत्तमात्मानं प्रयोज्यत्वं वाच्यं तावतावच्छेदविशेषविरहात्मककर्मत्वाद्यनवच्छिन्नतादिनिवेशं विना निष्प्रयोजनत्वेन इति
वाच्यं चैत्रः पचति तंडुलानित्यादौ कर्मत्वलाद्यर्थकप्रथमाबहुवचनान्तोपस्थाप्यो चैत्रैकत्वविवरेवदृत्तोपन्नतीयप्रथमा
द्विवचनान्तोपस्थाप्यस्यापि निरूपितैकत्वसाकाङ्क्षान्वयेनानिष्टस्यावारणाय तंडुपादानस्यावश्यकत्वात् तत्रान्वयबोधानुपू
र्वीज्ञानस्यैकत्वादिविशेषिततंडुलादिविषयकबोधं प्रत्यकारणत्वात्तादृशापत्तिवारणमित्यादिप्रयासस्तादृशयोग्यतायामता
र्थसाकाङ्क्षान्वयव्यवस्थापकत्वे दर्शितानां न नु प्रथमान्तपदोपस्थाप्यतापर्याप्तिकारणतादर्शनादेवेति चेत् इदं तु नीरूढावधेयं
दर्शितेन रविशेषणताविरहः शाब्दबोधकालावच्छेदेन पदसंबंधान्वयप्रयोज्यत्वमावश्यकं पकडत्वतादृशाभावस्य ।

20

द्द्बोधनिरूपितमुख्यविशेष्यताप्रयोजकत्वस्य प्रयोजकतो भयत्वं स्वैरिणविशेषणताविशिष्टप्रथमान्तपदानुप
स्थापकत्वकल्पने दर्शितस्थले मदृश्यावत्या शाब्दबोधीयविशेषणतायाः लाटद्वावैशिष्ट्यं प्रथमान्तचैत्रपदे बाधितं तत्प्र
योज्यस्यायामुख्यविशेष्यताया अप्रसक्तेरस्याकृतार्थ्ये विषयकेण बोधान्तरेणैव निरूपिततया दिनिनातिप्रसंग इति वा त
च्यं पत्र समूहालम्बनविधया मस्यागत्या शाब्दबोधे सुन्दराभिन्नश्चैत्रः इत्याकारकतावित्वानि प्रसंगस्य तावत्ताऽनु
द्धारात् प्रथमान्तचैत्रपदप्रयोज्यायां विशेषणतायां मुख्यविशेष्यतया रेकबोधनिरूपितत्वाभावात् यद्वापि भावना
न्वयबोधत्वं प्रथमान्तपदोपस्थाप्यत्वस्य जन्यतावच्छेदकं तच्च सामान्यबोधत्वस्य व्यापकमात्मनेनभावना
नवगाहिसामान्यबोधाजनकत्वात् यावत्ता पर्कपुरुषावच्छिन्नकारणविरहेणैव प्रथमान्तपदानुपस्थाप्ये सामान्व
त यबोधापत्तेर्वचनात् सामान्यबोधतावच्छिन्नस्य प्रत्यकारणतानकल्पनीया न चैवविनिगमनाविरहात्तस्य
सामान्यबोधे स्थापितजन्यतावच्छेदकत्वमात्रभूपकमिति वाच्यं सामान्ययानवगाहित्वोपि भावनान्वयबोधस्यानुभ
विकतया भावनान्वयबोधत्वस्यावच्छेदकतया ग्राह्यत्वरूपकत्वेन विनिगमकसद्भावादिति नदयितुं भावनासामान्यादौ
सांधातासामान्यादिभिः प्रत्येकमुपस्थितम् विशिष्टानुपूर्वीमत्कांकांदाज्ञानेन विशिष्टान्वयबोधोपपत्तेः प्रथमान
पदोपस्थाप्यतायाः कापि कारणतायाग्रनावश्यकत्वेनाकल्पनात् तद्वैयजन्यतावच्छेदकविचारस्याकाकंतत्प।
रीत्यायमाभावात् ननु प्रथमान्तपदानुपस्थाप्ये भावनाद्यन्वयबोधवारणाय तादृशकार्यकारणभावस्यावश्यक
इति वाच्यं विशिष्टाकांक्षाज्ञानकार्यतावच्छेदककुक्षौ प्रथमान्तपदानुपस्थाप्यभासो तद्वगाहित्वस्याप्रनिवेशनप्र।
योजकविरहेणापत्त्यनुपपत्तेः ग्रंथकृता तस्याप्येतावन्तःप्रसंगावच्छिन्नत्वं तद्विलम्बकारणतानिरूपिताद्वृत्तिनस्यम

मद्रा
प्रमा
पृ·
८५

२१

कास्थले भगवत्तात्पर्यज्ञानाद्यवोधः इति सिद्धांतस्तु स्वप्रमाणत्वाभगवत्तात्पर्य्येस निरपेक्षेनतत्कालावच्छेदस्य वि
शेषणतया तदीयविषयत्वस्याभावात्प्रसिद्धार्थ(अभिधानयोग्यत्वनिर्वचनासंभवप्रसंगाद्देत्रा(ऽ)विशेष्यस्य वि
शेषणतयाशाब्दांतरेभानात् तन्मात्रविषयिण्याभगवदिच्छायास्तत्वेन तद्विषयकत्वाद्यप्रकत्वादितिवाच्यं
भगवत्तात्पर्य्यज्ञानाच्छाब्दबोधस्यसिद्धांतितत्वेपि सिद्धांपिरतात्पर्यानपलापाच्छि(न्न)दापितत्तात्पर्य्यमादायैवसंवा
दिस्थलेपि निर्वाहसंभवादित्यस्यदर्शयितुमीलितं इदं तु बोध्यं भाविभूतवस्तु नस्ताद्दशस्यात्रापि तात्पर्यस्थलेत
त्पर्य्यकालावच्छेदेनतादृशविशेषणताविरहवत्वं तादृशवस्तुनिवत्कृमणाकामवच्छेदाधिकरणसंबंधस्यतात्प
यर्य्येकालस्यनद्वृत्तिविरहानवच्छेदकत्वादतः स्वबृत्तितावच्छिन्नमुख्य विशेष्यताविषयतानिरूपकत्वाभावव
शिष्टंपरत्वबृत्तितावच्छिन्नताद्दशविशेषणत्वाविषयतानिरूपकत्वतद्भाववत्तद्बोधविषयकतात्पर्य्यकत्वं त
द्बोधेलाद्दशासंख्याभानयोग्यत्वावच्छेदकंवत्तात्पर्य्यमिति पर्य्यपि वैवेण हुयतद्मादेधात्वर्थत्वापादैष(व्या)त्वस्य
वोधवारणमपि द्वितीयदलप्रयोजनं संभवति चेत्समवेतत्वं तिज्ञेयामेध्याप्यनः संयोगादेमाकारकस्ववोध
स्यतत्तदयेनविशेषणतयातात्पर्य्यविषयताविरहस्यत्वात् वाधितत्वात्तस्यमुख्यविशेष्यतयैवतात्पर्य्यवि
षयत्वात्तस्यापिद्वत्वेन पदोपस्थाप्यता निवेशेनापि तद्वारणसंभवाद्वितीयाद्यंतोपस्थाप्यस्य(आत्व)यवार
णमेवप्रथमात्वेन निवेशप्रयोजनमितिप्रतिपादयंस्तदेवद्वितीयदलप्रयोजनत्वेनदर्शयति प्रथमकर्म्मादाविति
पदेसमानाधिकरणपदेपदेतिप्रथमाधिकरणीभूयनविशेषणत्वेतात्पर्य्यमिति मदाविकल्पांतः करणेयानिस्तात्प
र्य्येकमयुक्तमलनया तंडुलादिमुख्यविशेष्यकवोधतात्पर्य्यकत्वात्तंडुलंपचतीत्यादिवाक्यमप्रयुक्तंस्यात् तदानी

कारणतया पूर्वं दण्डावच्छेदेन सत्त्वानावश्यकत्वात्तात्पर्यपर्यालोचनानुपपन्नमनन्त्योक्तं नच तदंशे ग्रहस्य भ्रमत्वमेवेति भ्रमत्वग्राही
त्वादेः समूहालंबनविषयतापदार्थस्मरणाभिलाषस्यापि महावाक्यार्थबोधे भानं तादृशबोधकालावच्छेदेन तत्राप्ये
विशेष्यताविरहविशिष्टेतरविशेषणताविरहस्य चैत्रादेः सत्त्वादिति प्रसंगस्यैव एवानुनीत्या यदनुरोधेन विशेष
णस्यावश्यकतादिति वाक्यं तात्पर्यपर्यन्तानुसरणेऽपि तादृशशाब्दबोधस्य तत्त्वात् नच तादृशतात्पर्यवि
रहकालीनत्वस्य कालावच्छेदकतया निवेश्यः तन्महावाक्यार्थबोधतात्पर्यकालावच्छेदेन तत्राप्ये विशेष्यतया तात्पर्य
विषयताविरहात्मकविशेषणस्य विशेषणतया तात्पर्यविषयतात्मकविशेष्यतासत्त्वेन विशिष्टविरहाभावा
त्तानि प्रसंगस्य बोधविषयकतात्पर्यकालावच्छेद्यतादृशाभाववत्ते तद्बोधे तादृशमहावाक्यज्ञानप्रयोजकमिति नि
यमादरणीयान्तरवाक्यार्थबोधविषयकतात्पर्यकालावच्छेद्यतादृशाभाववत्त्वमादाय दोषः नन्वेवं प्रयो
जकशाब्दाधारकपुरुषीयत्वस्य तात्पर्यानिवेशनीयतया चेन्नेश्वरीयजीवान्तरीयं वा तात्पर्यमादायातिप्रसंगः इति
वाक्यं महावाक्यार्थबोधविषयकमेव तात्पर्यं पदार्थान्तरवाक्यार्थबोधविषयकसमूहालंबनरूपमेकमेव ग्राह्यं
तद्धितप्रशतात्पर्यकालावच्छेदेन तद्बोधानिविष्टविरहाभावाद्व्याप्तेर्निरस्तातिप्रसंगात्मतत्वादिति यदि च कारणभावा
नभिधानात्तथापि वारणेन द्रलिकरः प्रागिक्रमेदेदं शुमादले समूहालंबनात्मकतात्पर्यं तत्र नोपमानवाचकतेन तत्प्रथ
मानससमेदं नानिवेशनीयमिति नोक्तिर्न्याः ततः इति विभाव्यते तदानीं तात्पर्यं गभिन्नो नावच्छिन्नशेषः इति स्मर्तव्यं पोलका
र्थकाश्रयाभावा निबन्धनेन लाघवगौरवयोः किं विकरणे सौभाग्यान्तरस्योपादानताज्ञबोधकत्वया ग्रन्थोन विशुद्धाले
रविसंवादिशुकादिवाक्यस्थलेऽपि तत्तात्पर्यकालावच्छेदेन तादृशाभाववत्त्वोपपत्तावपि हेत्वादिशुकादिवा

गदा॰
प्रमा॰
व्यु॰
५६

धात्वर्थातिरिक्तापदार्थे विशेषणतयान्वयित्वं नियमस्तु विरहाभावादिति भावः। स्तोकादेर्वारणायेति क्रियाविशे
षणस्य धात्वर्थप्रकारत्वाभ्युपगमेऽप्यभेदसंबंधेन विशेषणतयान्वयितया विशेषणतात्मकप्रथमदललाभेनापायादि
तिभावः। तस्य स्तोकादेः द्वितीयान्तपदोपस्थाप्यत्वात् द्वितीयान्तपदमात्रोपस्थाप्यत्वात्। तेनैव स्तोकं पचती
त्यादौ द्वितीयान्तपदोपस्थाप्येऽपि चैत्रादौ संख्यान्वयेन हेतुर्व्यभिचारीति निरस्तं। तस्य चैत्रादेः प्रथमान्तपदेनाप्यु
पस्थाप्यतया द्वितीयान्तमात्रोपस्थाप्यत्वाभावात्। प्रथमान्तपदानुपस्थाप्यत्वादिति निष्फलितं। यत्पदावृत्ताख्या
ख्यातोपस्थाप्यसंख्याप्रकारतानिरूपितविशेष्यतासंबंधेन बोधं प्रति स्वनीतरविशेषणत्वमात्रतासंबन्धेन विषय
स्थितित्वेन धात्वर्थातिरिक्तमात्रनामार्थस्य विषयस्थितित्वेन वा विशेषितेन विशेष्यतासंसर्गेण प्रथमान्तपदजन्योपस्थि
तिः कारणमिति पर्यवसितं। नन्वत्र दर्शितकार्यतावच्छेदकावच्छिन्नं प्रति विशेष्यतासंसर्गेणाख्यातजन्यकर्तृक
र्मोपस्थितिर्हेतुरिति कार्यकारणभावे लाघवमेव च कर्तृकर्मण्याख्यातार्थत्वे विपरीतलाघवाद्दुचितमिति वै
याकरणमतमप्याग्राविपतितं तदुक्तं आकांक्षाज्ञानकार्यकारणभावेनावश्यकेनैवाप्रसंगातिप्रसंगभंगे दर्शितका
रणभावानावश्यकत्वमप्युपपादितत्वात् शुद्धधातुमात्रप्रयोजनकफलितार्थप्रदर्शने लाघवगौरवयोर्विचार्य
त्वात्। एतेनाकांक्षाज्ञानावच्छेदकलाघवादियुक्तिसाचिव्येनाख्यातस्य कृतिशक्तौ सिद्धायां निरूढलक्ष्यपर्यायिकरण
णायेनोत्तरकालकल्पनीयकार्यकारणभावप्रयुक्तगौरवं फलमुखत्वात् किंचित्करं स्वाभिविशिष्टवैशिष्ट्यावगा
हितया परामर्शस्य कारणतासिद्धौ हि विना हेतुज्ञानस्यान्तराकल्पनप्रयुक्तगौरवावतारे नान्यैवकारसहकृतगौरवं
प्रथमदलस्यानुपादेयत्वात् चैत्र इव मैत्रो गच्छतीत्यादावुपमानेनार्थसंख्यान्वयोऽपि द्वितीयविरहात् प्रथमान्त

१२

उक्तादौ तादृशसंख्यान्वयबाधकाभावस्थितीयं दलमित्याशयः । ग्रन्थे तद्दलनिवेशेपि विशेषणतया नान्तर्भावविषयतावि
रहितप्रकारतादिलाघवात् प्रथमान्तपदोपस्थाप्ये । तादृशसंख्यान्वयापत्तिरेवं चैत्र इव मैत्रो गच्छतीत्यादौ यदा वैशि
ष्टेर्न विशेषणतयान्वयविषयत्वेन दानस्यापीति चेन्न नन्नत्र प्रथमान्तपदभेदस्य प्रथमान्तपदे निवेशनीयत्वात्तन्न
चैवं भेदनिवेशे नानिष्टसंगमेगगत्प्रथमदलवैयर्थ्यमिति वाच्यं तादृशविशेषणतयान्वयविषयतया प्रथमा
न्तपदोपस्थाप्यकर्मत्वप्रमानादीनामनुगतरूपेणैवादिमांशेत्वावबोधनदुपादानात् यत्तु न विशेषणत्वेनान्वय
मित्यस्य सावधारणपदवत्त्वाविशेषणतामात्रेणान्वयमिति तदर्थः । एवं च तत्तुल्यवतीत्यादौ विशेषणत्वमुख्यवि
शेष्यत्वास्याततुल्यत्वमेव पदार्थान्वयपदान्ततुल्ये संख्यान्वयवारणाय प्रथमान्तेत्यादिदलमित्यभिप्रायः इति वदन्ति तन्मा
निकविरुद्धस्तीनरोपेष्टोपपत्तेमाप्रपदार्थानन्वये संख्यान्वयस्थानावश्यकत्वादिति नन्वपि स्वर्गकामो यजेत
त्यादौ विधेयस्य यजनमात्रत्वविवक्षितत्वार्थः निपातोन्यतया के निपातनत्यायाप्तसर्गकर्मयापान्वर्थ्यमो स्वर्गकामान्वयानन्त
निष्ठायत्नमविधिविघ्नतावच्छेदकः इति मतेन तदा स्वर्गकामादौ संख्यान्वयानुपपत्तिः कृतीनस्त्विन्तयागे विशेषणतये
वान्वयर्थविषयत्वादिति चेन्न तत्र प्रथमदलार्थसम्पत्तिर्वावैतिपद्वेति प्रकारान्तरेण द्वितीयदलस्य प्रयोजनान्तरमथ
मदलमनपायविशृणोति यद्वेतीत्यवताड्ः धात्वर्थातिरिक्तेति इत्यपि धात्वर्थातिरिक्तविशेषणत्वमुख्यविशे
ष्यतापि रहितविशिष्टतादृशविशेषणतावि रहस्वत्वं तेन चैत्रः पचवपचतीत्यादौ चैत्रादेर्धात्वर्थातिरिक्तैककारणत्वोपयो
गाभावेपि स्वर्गकामादौ विशेषणत्वेपि तत्र संख्यान्वयानुपपत्तिस्तुल्यविशेष्यत्वस्यापि सत्त्वेनाविशिष्टविरहात्या
द्वेत्यतिरिक्तं तत्स्वर्गकामादौ संख्यान्वयानुपपत्तिवारणाय प्रत्ययतावत्पदवैयर्थ्यवत् चैत्रादेर्वारणमिति धात्वर्थेति

इत्युपगते यथाप्रथमं तार्थस्तु स्वविशेष्यकं यत्प्रबोधमात्मपराज्ञतां तथात्मत्वाभिः क्रियामात्रस्य विशेष्यकं तमुपगच्छतीति
तथैव प्राकृतावच्छेदकारोपविषयनिष्ठः शक्यसंबंधोलक्षणोत्पर्थकं लक्षणारोपिता क्रियेति स्वरूपतोऽप्रयोगायोग्ये गंगायां घो
षः इत्यादितो गंगात्वादिनाश्रावतावच्छेदके नैवतीरादिप्रतीतिः जनयाग्रत्यप्रावनतादिप्रतीतिनिर्वाहायालंका
रिकाउपात्तिति तदितरेषां तु शक्यार्थसंबंधिता वृत्तेदकरूपेणोपलक्षणार्थमानमंगीक्रियते न तथात्मस्मृतिः शा
क्यादर्थे न तु रूपेण तातेभवति लक्षणेति सिद्धांतात् अभिधेयमित्युक्तेऽप्रधानप्रत्ययार्थैव वनमर्थस्यान्यप्रमाणत्वा
दितिसिद्धप्रमतापाणिनिनाप्युरीकृतोयमर्थः प्रत्ययार्थः प्रधानप्रकृत्यर्थोऽशविशेषणतयैवभासते इति वचनमभिप्रायमकात्स्न्य
र्थस्मन्यायार्थविशेष्यकप्रकृत्यर्थप्रकारकबोधात्मकप्रयोजनस्यान्यप्रमाणतात् स्वस्वयमितिनपवसिद्धत्वादितिदि
तदर्थः नवारोपे सतिनिमित्तानुसरणे न तु निमित्तमस्तीत्यारोप इतिन्यायेन शाब्दबोधात्मकफलानुरोधेनैवशाब्द
बोधकालज्ञानयोः कार्यकारणभावात्मिकाप्रवृत्तिः कल्प्यतेन न तु स्वमनुसारेणताद्दशफलमितिप्रसक्ति
सिद्धत्वदर्शितप्रयोजनस्य बाधितमिति वाच्यं फलानुरोधेन कल्पितयाप्यविच्युत्पत्तेर्ज्ञानेताद्दशबोधेह्यावतत्ता
शब्दप्रयोगे कारणं तत्स्वलाद्दशो बोधः इति स्वस्यधीनतायां तत्त्वमानपायादिति चेन्नैवं पस्तु नापजोते तिष्ठ
तावेकवचनोपात्तैकत्वसंख्याया विशेषणभूतप्रकृत्यर्थेपत्नु विशेषणमितिसंशये तत्रैकत्वमयस्ताराम
र्थे स्पगुणभूतत्वादितिसूत्रेणप्रकृत्यर्थविशेषणत्वमनुगतं पूर्वपदस्यपिताशद्वत्यलभ्यतेनद्वारामेदितिइप्यते
तस्यतानयथान्येषामितिसूत्रेण शाब्दबोधेहि शाब्दस्यैकत्वमनुपलभ्यतेयत एकवचनादिप्रयोगोऽप्युपपत्तेः तत्सम
प्रधानभावतानमाहरणादिविधिप्रसंगेनदर्शितत्वात्ः यद्वैकत्वोभयकारणकोयागइतिवोधरैकत्वस्ययागा

ज्ञानं न त्वयं साक्षात्प्रयोजकधर्मो बोधादृष्टार्थतापत्तेः विवक्षितार्थबोधप्रयोजकस्य तदनुपादानं विरुद्ध
स्याग्रहणादोषः नवप्रथमत्वादनुपादाने भुक्तान् ब्रजतीत्यादौ कालार्थेनान्वयासंभवात्परापत्तिर्दोषशतिकाया
मप्रयोजकत्वादेव न ज्ञात्स्वयमसत्त्वेऽपि कारकत्वमाधानाभावादिति निरस्तः कार्यकारणभावाकल्पनेनो
त्तरस्याप्रसंगेनैतादृशप्रयासस्य निष्फलत्वात् प्रथमत्वादनुक्तौ कर्मत्वादत्तिक्रमप्रथमांतत्वादृशसंख्या
न्वयापत्तेरनुद्धारात् भुक्तेत्यादिनार्थबोधनेनोत्तरत्वादावपेक्षात्तु द्विविधोपविषयतादिरूपैकतापत्त
येनावोधकतासमाधानासंगतेः उपमानेसंख्यानन्वयेः प्रष्टृत्वादौषशुष्कविचारचातुरीतत्रसंख्याया विवक्षि
तसादृश्यप्रयोजकत्वेन तदनुपादाने तदप्रसराः इति महांतर्याचिन्तस्तु आरब्धेपि पाकेफलस्यानुत्पत्तिद
शायां पाको जातो न वेति प्रश्ने पचति पचतीत्युत्तरस्यानुभविकप्रामाण्यस्यास्यानुपपत्त्या फलमेव धात्व
र्थः न तु भावनात्तस्या धात्वर्थत्वे तत्तुल्यविशेष्यकसंदेहकारकाकालाभावेनाकारके
प्रत्यानुपपत्तेः प्रत्ययार्थः प्रधानमिति न्यायात् अत्रायं न्यायो अविवक्षितत्वावार्थसाधकत्वा द्विप्रस्थ
श्रेष्ठीत्यादीनां प्रकृत्यर्थविशेषणत्वेनैवान्वयबोधदर्शनात् सोप्यल्पेनैव विषयोयमिति चेद्भ्रमित्यारम्भ
णमनिष्टत्वेन तद्धितमात्रविषयत्वस्यापि किंतावता वचनेस्तव अर्थस्यापि संख्योयाः प्रकृत्यर्थविशेषणत्वेना
न्वयदर्शनात् नवैवमत्र द्वित्वेपि समेति यो नस्यादिति वाच्य तत्तत्सदृशबोधात्मकफलदर्शनेनक
ल्पितत्वाद्यानादृशानुभवस्याबाधकत्वात् नहि नियमनिर्माणे प्रभुस्मृतिः शकानिर्बंधोपिने फ
लानुगोपित्वान्नानुत्पन्नताया अनन्यथासिद्धस्य फलसंप्रयोगाख्येन प्रत्ययार्थस्यानुत्पत्तिरविपरि

मद्या
प्रभा
पृ·
४८

94

ख्यातवाच्यतायां गौरवमानर्थक्यं च पचतीत्यादेः पाकं करोतीत्यादिविवरणं तु धात्वर्थविवरणतयापि चरिता
र्थमतो नाख्यातस्य व्यापारमात्रवाचकत्वं साधकं न च फलानुत्पाददशायां पाको जातो न वेति प्रश्ने भविष्यतीत्युत्तरा
संगतिर्धात्वर्थे व्यापारत्वावच्छेदे रूढे इति वाच्यं तत्र फलांशे पचतीत्यर्थस्यानुभविकत्वात्तदंशे गमनेन व्यापारांशे मोघे
ऽन्वयाबोधात्तथैवोत्तरस्य संगतेर्न तावता व्यापारस्य धात्वर्थता हीयते दृष्टान्तदोषकदम्बेनाख्यातवाच्यताया
वक्तुमशक्यत्वात् आतपलक्ष्यमाणत्र्यधिकरणमुक्तं तत्सामग्र्युपधायकत्वात् प्रकृत्याख्यातेनतत्प्रतीतेः पाकानुकूलवर्त्त
मानयत्नवानिति बोधस्यादेयतामनुपपत्तेश्च प्रतीतेस्तत्र नामाख्यातयोरनेकार्थत्वेन पाकत्वावच्छिन्नवर्त्तमानयत्नस्या
प्रसक्तत्वात् न च सामान्यतः पाके नानुमितेऽपि यत्नेन साक्षात्तदर्थवर्त्तमानत्वान्वयानुपपत्त्या बोधो न स्यादिति वाच्यं पदा
र्थः पदार्थेनान्वेतीति नियमेन पदार्थैकदेशानुमितयत्ने तदनाकाङ्क्षासंभवात् यदि च समूहपतः श्वेतमात्रं पश्येत् तथा शब्दं चेष्ट
एव तत्त्वज्ञविशेषपदस्य चेष्टितान्वयबोधावतीतिधीरितिसकलैव सा प्रमाणा पदार्थैकदेशेऽपि यत्ने तादृशवर्त्तमानत्वान्वयः
संभवतीति चेत्तदापि समानपदोपात्ते व्यापारे वर्त्तमानत्वबोधयत्नस्याख्यातस्यानुमितेऽपि यत्ने तद्बोधकताया
मसामर्थ्यमवेदनिराकाङ्क्षत्वात् न च वर्त्तमानत्वविशेषिते तत्पाके नवर्त्तमानयत्नानुमानसंभवात्तत्र वर्त्तमानत्वबोधे
वर्त्तमानत्वादिभानापेक्षायामनुमितिसामग्र्यसंपन्नत्वात् पि यदि तादृशभानं तदा यत्ने साक्षादाख्यातस्य शक्तिस्वीमान
दृश्युपपद्यतामिति न कश्चिद्दोषः यत्नाभावकाले विपाकस्यानुत्पत्त्या कालिकव्याप्तिविरहेऽप्यानन्तर्यादेशिक
संसर्गावच्छिन्नव्याप्यव्यापकताज्ञानादिति वाच्यं तादृशव्यापारवाचकतामुपेत्यानुमानेन यत्नलाभकल्पनामपेक्ष्य लाघ
वेन यत्नशक्तेरेव सिद्धेः यत्नताशे भावनानुकूलतोपचतीत्यादिप्रयोगो व्यापारलक्षणयाप्युपपद्यते शक्तिकल्पने

गतप्रतिपादकत्वादनेकपदसुकरणकत्वं तथा गमस्येति किमुहांतथा नाम गतानां जैमिनिना प्रयाणानां प्रधानभाव
स्याविदितत्वात् हवादीनां तु गृहीतादयोन वाक्याः किं तथोत्पाइतिनदर्शितव्यभिचारः यद्यपि भावनाया
पि वाक्येन फलावधि न व्यापारार्थकतादिरूपं सकर्मकत्वादिनशक्यते निर्वक्तुं तथापि स्वार्थफलोपरक्तस्व
समभिव्याहृतान्याख्यातार्थभावनाबोधजननयोग्यत्वं सकर्मकत्वमित्यादिनिरुक्तिसंभवाद्दोषः न च पक्ता
नितान्तादेः पाकं कृतवानित्यादिविवरणेन धातोरेव भावनावाचित्वं निर्णीयत इति वाच्यं पचतीत्यत्र पाकं करो
तीति विवरणस्येवास्यापि प्रमयार्थविवरणत्वात् कृत्तामपि भावनावाचित्वे यागमेवापकाभावात् न च भाव
नायाः आख्यातवाच्यत्वे पाकानुकूलयत्नवानित्याद्याकारकबोधस्यानुभविकस्यापलापापत्तिरिति वाच्यं तादृ
शबोधस्याप्रसिद्धेः क्वचित्तादृशयत्नबोधस्यानुमानतस्तत्र संभवादित्यमन्यंते ननु इदं न विरुद्धं यदि व्यापारेणे
ति गोत्वादिति यत्तत्वजातिमपेक्ष्य व्यापारत्वस्योपाधेर्गौरवेण ग्रावकतावच्छेदकत्वासिद्धेरित्यर्थः फलं फल
मात्रस्य धातुवाच्यत्वे ग्रामो गमनवानित्यादिप्रयोगप्रामाण्यापत्तिर्धात्वर्थस्य संयोगस्यैव भावकृदर्थत्वेन पा
ग्रामेतद्बाधात् ग्रामाण्यापत्तिश्च संयोगो गुणः इत्यादिस्याम न तु गुण इत्यादेनं च भावकृतोऽपि व्यापारार्थ
कत्वसमाधानं शक्यं मानाभावात् तथा तत् संयोगानु कूलव्यापारदशायां तदनुगमनेनोगमनं भवतीत्या
देः ग्रामाप्रामाण्यापत्तिः फलस्य हरत्वात् तदवि क्रिया इत्यादेन दनु कूलव्यापारदशायां पाको भवतीत्यादेरपि तथात्वानि
त्युते व्यापारसंसारे पाको विपने इत्यस्य प्रामाण्यापत्तिश्च भावकृतो व्यापारार्थकतावेन संभवति भावेऽनुशासनस्य
निष्फलत्वापत्तेर्व्यापारार्थकतायाः कर्तृत्वस्यापि निर्वाह्यतो धात्वर्थापि व्यापारः कामेना पिवाक्यस्याचतस्य

गदा
प्रभा
प्र०
५९

रेणान्वयेन संभवतीत्यपि प्रत्युक्तं घटादिपदस्थले घटत्वपुरस्कारेण प्रतियोगिपरिचायकत्वे तथात्वसम्भवेऽपि कोंतरा
ऽसम्भवेन तादृशान्वयबोधस्य तन्त्रेणैव वारितत्वात् तत्र घटत्वविशिष्टस्य तन्नेः कल्पनाया अनावश्यकत्वादिति मन्यन्ते तदपि
न युक्तं विनाप्यानुपूर्वीसामग्रीं तत्त्वबोधस्यानुभविकत्वात् सम्बन्धितावच्छेदकसंसर्गस्य प्रतियोगितानवच्छेदक
त्वेन चैत्रेण न पचतीत्यादौ नञर्थान्वयानुपपत्तेश्च कृत्यादेः संसर्गताकल्पनायाश्चासंभवात् संयोगादिसंसर्गा
वच्छिन्नप्रतियोगिताकभवनाभावबोधोपगमे घटः पटो न भवतीत्यादौ तादात्म्यप्रत्ययोगप्रामाण्यापत्तिः चैत्रः पच
तीति वाक्याधीनबोधानन्तरं चैत्रः पाकानुकूलकृतिमानिति मानसबोधापत्तिः संसर्गविधया तादृशकृतेर्भानस्य प्रतिबन्धकता
या समानप्रकारकत्वस्य विरोधितायां तन्त्रत्वात् तदनन्तरं भवदपि तादृशावगाहितया तादृशवाक्याधीनबो।
धोत्तरं चैत्रे संसर्गाविधया पाकानुकूलभावनावगाहित्वाच्च प्रतिसंशयस्यानुत्पत्त्यापत्तेः प्रमेयानुभावकत्वसाध्य
त्वात् अथ न पचतीति चैत्र इत्यादिना तादृशसंसर्गाभाववतो बोधः प्रतीयतां चैत्रः पचति न वेति संशयेऽपि तादृ
तादृशोभयकोटिकसंशयानादृशसंसर्गावच्छिन्नप्रतियोगिताकभावनाविरहस्याप्रसिद्धत्वादकोटिकसंश
यस्यालीकत्वात्तेनेतादृशमानसवाक्याधीनबोधान्तरं तादृशसंशयापत्तिरपि तद्वच्छिन्नप्रतियोगिताकभेदप्रका
रकत्वादावपि तत्प्रकारकनिश्चयस्य विरोधितादिति चेन्न तादृशसंसर्गाभावनावतः पदादनुपस्थित्यान्वया
नवच्छेदकत्वबोधयितुमशक्यत्वात् यदि तत्र समभिव्याहारस्थले तादृशसंसर्गेण तादृशभावनाव
त्त्वाभावरीत्या क्रियते तदाप्यानुभविकपक्षप्रकारकत्वापलापो गौरवमनुपपत्तिप्रतिसंधानमन्तरेणापि
नञ्समभिव्याहारस्थलीयबोधस्यानुभविकस्यापह्नवश्चेति दूषणानां हरिनिर्दयतया व्यापारेऽधिकारिणोंतस्म

25

दोषेणापि व्यापारशक्तिसिद्धिः भावनाशक्त्यादिनोपि तद्व्युत्पत्तौ तदुपधायकत्वं तद्दशायां तादृशप्रयोगप्रा
माण्योपपादनाय यत्ने लक्षणायाः शक्तिस्त्वस्य वा पृथक्कल्पनीयत्वात्तावता पि गौरवानवकाशादिति
प्राभाकरास्तु विक्लित्त्यादिफलानुकूलाभावनायां धात्वर्थ एव तिङर्थस्तु संख्याकालविशेषादेवानन्यलभ्यत्वात्
इत्थं च रथो गच्छतीत्यादावुत्तरसंयोगात्मकफलानुकूलस्पन्दादिव्यापारस्य गमिप्रयत्नधात्वर्थेन निर्वाहात्
तद्गुणावच्छेदकी विक्लित्त्यनुकूलव्यापारस्य यत्नं विनानुपपत्तेर्यत्ने पाकाख्यलाभः अस्तु वा तदनुकूलस्तोभिन्न
त्वसंसर्गेण चैत्रादौ भावनान्वयः रथो गच्छतीत्यादौ तु कम्पः स्वसंसर्गेणान्वय इति वैचित्र्यात् न च क्रियमाणत्वप्रतिपदि
कार्थे योरमेदानि रिक्तसंसर्गेणान्वयस्याव्युत्पन्नत्वाद्दर्शितसंसर्गेण प्रातिपदिकार्थे धात्वर्थान्वयः संभवतीति
वाच्यं चैत्रः पच्यते इत्यादिनदेशाश्रयादेः स्वसमवेतकृतिसाध्यत्वादिनौदनः पचतीत्यादिनत्वौदनादेराधेयतया
त्मकक्रमेत्वादिना संसर्गेण धात्वर्थेऽन्वयबोधादर्शनेन धात्वर्थप्रातिपदिकार्थसम्बन्धाविधानयाभ्युपगमात्
विप्रातिपदिकार्थे धात्वर्थस्य तादृशान्वयबोधकाभावात् न च चैत्रः पाक इत्यादि तत्रैत्रादौ तादृशांशसंसर्गेण
पाकादेर्धात्वर्थस्यान्वयबोधवारणाय शक्तिविलक्षणप्रातिपदिकार्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नत्वमेव
तद्वारणात् एतेन दर्शितत्वाकात् पाकादेर्धात्वर्थपक्षेपि स्वसमवेतकृतिसाध्यत्वादिना संसर्गेण चैत्रा
देरन्वयापत्तेः क एव पाक इत्यादौ कारके वा प्रत्ययेऽवारणं यथा धात्वर्थप्रातिपदिकार्थस्तत्त्वया विप्रो
ऽन्वयोः व्युत्पन्नत्वस्यैव पमितिदर्शितत्वकारणान्वयानुपपत्तिरपि प्रयुक्तपाकादिपदस्य लेधात्वर्थ
स्य कृदन्तप्रातिपदिकार्थेन धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयो व्युत्पन्न इत्यस्य पमितिदर्शितत्वका

महा
प्रभा
भूः
५०

96

समानत्वेपि यत्नस्य तत्पातनस्य तन्मनयावस्त्राग्रंकराग्योः कृतत्वाकृतत्वे विभागेन व्यवस्थिते तथा तत्त्वं तस्यात्
नाश्रुत्यत्वस्य करोपदस्य यत्नाश्रयवाचकता वक्तव्यकी कृञः क्रियार्थकत्वे क्रियाश्रयस्य करोपदार्थत्वात्कारक
मात्रेति प्रसंगापत्तेः अभिहितेत्याद्यर्थः कृताकृतविभागेन कर्तृरूपव्यवस्था या यत्नपदस्फूर्तिः पूर्वापरस्मिन्नेव भावने
ति कृतेराख्यातार्थत्वे भावनायाल्रर्थत्वमुक्तवाह आख्यातमाशंक्याह पूर्वापरस्मिन्निति पूर्वापरीभूतव्यापारसंता
नात्मकधात्वर्थविषयिकासैव फलभावकत्वेनाख्यातार्थो भावनेत्यन्वयः एतेन रथो गच्छतीत्यत्र जानाति
यतते निद्राति समवैति यत्र स्पन्दे यततीत्यादौ धात्वर्थानुकूलयत्नवाचित्याख्यातप्रयोगान्न तस्य यत्नो वाच्यः एवं र
थो गच्छतीत्यादौ गमनं करोतीत्यादिविवरणात् तत्कृतोपि न यत्नो वाच्यः नानाविवरणे करोतेर्व्यापारार्थकत्वमा
ख्यातस्य वर्तमानव्यापाराश्रयतार्थकत्वमगीकार्यमिति चेन कल्पनालाघवाद्येन नकारकस्थलेपि यत्नवा
च्यतान्ययोरर्थः अतो व्याख्यार्थकत्वे बाधकविरहात्तत्तया ख्यानकरोत्योर्गौणत्वसमाधानमसमाधानं प्रयोगत
रयोरपि यत्नार्थकतासाधकत्वं क्रियासामान्यार्थककरोतिना प्रश्नस्तद्विशेषार्थकेन पचत्यादिनोत्तरस्यानिष्ट
त्वहृत्वात् किंच यत्नार्थकता नोपपद्यते तथा सति सकर्मकतानुपपत्तेः स्वार्थफलव्यधिकरणव्यापारवाचक
त्वं हि धातूनां सकर्मकत्वं न चोत्तरसंयोगात्मकफलस्य कर्मकर्तृभयनिष्ठत्वात्तत्समानाधिकरणव्यापारवा
चकतायात्वप्रसंग इति वाच्यं स्वार्थव्यापारानधिकरणवृत्तिफलवाचकताया विवक्षितत्वादित्यादिदिशा हि कादे
मपि स्थितिरिमः कृताकृतविभागादिना कृञो यत्नार्थकतासिद्धौ तेन विवरणस्यावश्यकत्वाभावाख्यातस्य यत्नार्थकता
सिद्धौ रथो गच्छतीत्यादौ व्यापाराश्रयत्वादिरूपलक्षणायाश्चावश्यकत्वात् तन्मुख्य यत्नार्थस्य बाधादिति च रथो गच्छती

महा
प्रभा
प्र॰
५१

षणामिति विभाष्यते तदापि मातुः स्मर्यते इत्यादौ सकर्मकतापत्तिर्दोषस्तत्रापि मातरं स्मरतीत्याद्युत्तरो धेनावरणभं
गादिफलव्यधिकरणव्यापारवाचकतायाभावतावश्यवाच्यत्वात् एतेन लिङ्गानिमिद्धिर्नतत्वे नचेष्टापत्तेर्योगात्
नचसविषयकार्थकतया सकर्मकत्वसत्वपाण्यगीकारात् समानोयमनुयोग इति वाच्यं यत्निकरीत्याः समानार्थक
त्वेपि पतेः कर्माकाङ्क्षाविरहवदत्रापि तु हि रहस्य सुसमाधेयत्वात् अत्र पूर्वीभेदेन कर्तृकारणभावभेदादेकार्थक
स्यैकस्यापि धातोः प्रयोगभेदेन सकर्मकाकर्मकताकर्मकृत्वयोर्विरोधात् न च तत्रत्वमिति भेदेन तथाभावो प्रयोगभेदे योऽकृ
र्मकत्वापत्त्यापत्यार्थकत्वेनेत्यभिधानमुन्नतप्रलपितमेव स्यात् तथापि कर्माकाङ्क्षाविरतत्वमिति कल्पनमेव सकर्म
कतोपपादनसंभवात् स्यावस्यविषयकार्थानामावरणभंगाद्यात्मकफलवाचकतात्मकल्पनमनर्थकमिति समादधि
रे यतः कृताकृतविभागपरत्वात् तेनाबीजेनांकुरः कृत इत्यादिकृतेनत्वव्यवहारस्याकरेऽपि दर्शनात् न च कृताकृत
त्वव्यवहारो जीवकृतिसाध्यतातद्भावाभ्यामेवेश्वरकृतिसाध्यतायाः साधारण्यात् बीजेनांकुरः कृत इति व्यवहारस्य
प्रवृत्तेति कर्तृपदाध्याहारः कुलायां तृतीयायाः करणतार्थकता संभवान्नानुपपत्तिरिति वाच्यमध्याहारे मानाभा
वात् तावतापि बीजमंकुरं करोतीत्यादेरनुपपादनाच्च एवं कर्तृरूपस्यापि दर्शितानोपपद्यते कर्तृपदं हि नयोगि
कं तथाहि कृत्याश्रयत्वेनार्थकत्वे तत्र च कृत्यर्थकत्वे योग्यतान्वयबोधः कृतौ कृतिसाध्यताविरहात् न च प्रयत्नं
त्वेनार्थ इति कृत्याश्रयत्वबोधनान्नायोग्यतेति वाच्यं पचेत्यादितः पाकानुकूलप्रयत्नप्रतीतेस्तथात्वमशक्यत्वात् ना
पि कृत्याश्रयत्वं तदर्थस्तावतापि प्रकृते योग्यताउद्धारात् पचेत्यादितः पाककृत्याश्रयत्वप्रतीतेस्तस्यैवेनादि पद
र्थः भेदवापात् भेदान्वयासंभवाच्च प्रातिपदिकार्थयोर्भेदेनसतात्वनुपसाधनमुक्तत्वात् अथ न तादृशो बाधमनि

27

यस्य ते मानाभावात् प्रकृतपदार्थयोरभेदान्वयो नेति व्युत्पत्तिनियमस्यास्माकमनङ्गीकाराद्व्याख्यानशाले चावधूपकत्वापत्तेरप्रयो-
जकत्वाद्वायं नियमः प्रामाणिक इति चेत् प्रातिपदिकार्थयोरभेदान्वयो नेति नियमोऽपि तथा इत्थं च नीलो घट इत्या-
दौ समस्य इवैव नीलादेर्घटादावन्वयसंभवान्नीलादिपदानां गुणिनि लक्षणावश्यकी ग्राहकस्य विशेषण-
विभक्तिः साधुत्वार्थेति सिद्धान्त इति चेन्न प्रातिपदिकार्थयोरभेदसंसर्गेणान्वय इति नियमस्य सामानाधिकरण्या-
नुरोधेनावश्यकत्वात् सामानाधिकरण्यं ह्येकत्र संख्यान्वयबोधकत्वं नीलपदार्थस्य गुणस्य समवायेन घटादाव-
न्वयो मम मते नीलघटाद्यैकवचनोपस्थापितैकत्वसंख्याया अप्रकृत्यर्थे घटादावन्वयासंभवे तद्रूपापत्तेः प्रत्यया-
नां प्रकृत्यर्थान्वितस्वार्थबोधकताया व्युत्पत्तिसिद्धत्वात् नीलपदस्य गुणिलाक्षणिकत्वे तु प्रकृत्यर्थयोरैक्येन द्वाभ्या-
मेकवचनाभ्यामेकस्यैकत्वस्य नीलरूपवदभिन्नघटात्मकविशिष्टबोधस्य सम्पादकत्वात् सामानाधिकरण्यमुप-
पद्यते नचैवं विशेषणविभक्तिः साधुत्वमात्रार्थेति सिद्धान्तो भज्येत तस्याश्च विसंख्यार्थकताया आवश्यकत्वादिति वा-
च्यं नीलं घटमित्यादौ विशेषणविभक्तेरेकत्वार्थकत्वेन तद्योग्यतया संख्यावाचकत्वस्य सर्वसिद्धत्वात्
न वाच्याख्यातार्थसंख्यायाः अन्यमोक्तपदोपस्थाप्यैः प्रकृत्यर्थैः अन्वयदर्शनाद्भिन्नव्युत्पत्तिर्नियताख्यातार्थ-
संख्यातिरिक्तप्रत्ययार्थस्य प्रकृत्यर्थेऽपवादान्वय इति संकोचादरेण विशेषणविभक्त्यर्थसंख्यातिरिक्तत्वेन संकोचोऽपि
स्वरसतिवाच्यं समानपदोपात्तभावनान्वयित्वस्याख्यातार्थसंख्याया अप्रकृत्यर्थेऽन्वयप्रयोजकस्य सत्त्वेन ना-
ख्यातसंख्यातिरिक्तत्वेन संकोचस्य प्रामाणिकत्वात् इदं प्रयोजकविरहेण संकोचे मानाभावात् प्रकृत्याख्यप्रत्ययजन्य-
भावविकृतिविशिष्टस्य कृतो निरुक्तत्वानान्वयविधयः संभवः भावनायाः कर्मणिकर्मत्वेऽपि रुचः क्रियाख्यपदवाचक

त्यादौ व्यापाराश्रयत्वादिफलदशायामप्रावश्यकत्वानुरोधेन पत्तार्थस्य वाधादित्यं चरणो गन्तीत्यादौ गमनं करो
तीत्यादिकं गोपि व्यापारादिफलदशायामवश्यकीदर्शितप्रयोगान्तरस्यारोपितपत्तार्थकत्वमप्रत्यूहं सकर्मकत्वं तु गम्यादीनां
फलावच्छिन्नव्यापारार्थकत्वं करोतिजानातिस्मरतीत्यादीनां विषयकार्थकत्वमेव व्यवहारे तत्तद्रूपेणाभा
द्गमकविरहेपि तत्तिविरहात् अतः सकर्मकत्वानुपपत्तिरपि पत्तार्थकतायां परिहृता प्रत्युत तदोषसक
र्मकत्वस्याधःसंयोगावच्छिन्नस्पन्दार्थकपतत्यादावतिप्रसंगः तदर्थफलस्याधःसंयोगस्य व्यापारानधिकरणदेश
वृत्तित्वात् नच फलावच्छिन्नव्यापारार्थकत्वानपायेन तत्वापि तत्समेत्वं परमिति वाच्यं प्राधान्येनावच्छिन्नत्वेन फलं
विशिष्य वारणासंभवात् नचैवारीतिस्तत्व संभवति प्राधेयतासम्बन्धेन फलावच्छिन्नव्यापारार्थतरसंयोगादिसाधारणेना
संभवात् फले तत्पर्याप्त्यात्मकार्थतावच्छेदकस्वरूपसंबन्धरूपावच्छिन्नत्वस्य निविष्टतया गम्यादिधातूपस्थाप्यतायाः
फलस्य तेराधेयेनावच्छिन्नतया पर्यवसिततायाः शक्यतावच्छेदककोटिप्रविष्टेनाधेयेनावच्छिन्नतया च तत्प्रसंगातिप्रसं
गो वस्तुतस्तु गुरुत्वजन्यतावच्छेदकीभूतपतनत्वजात्यवच्छिन्न एव पतेः शक्तिरस्ताकं फलव्यापारौ धात्वर्थ इति निय
माभावेन तथा च तादृशजात्यवच्छिन्नक्रियावाचकस्य फलावच्छिन्नव्यापारार्थकताविरहेण तद्विषयकार्थकता
विरहेण सकर्मकताप्रसक्तिरेव नेति तत्त्वं यदि च समवायेन पर्याप्त्यात्मकस्वार्थतया माश्रयावच्छिन्न
त्वं निवेश्य तदाश्रयत्वेन फलं निवेशनीयमिति तदा दोषः तत्प्रयत्नशरीरसंयोगविशेषात्मकस्य मनःशरीरसंयोगवि
शेषात्मकस्य वा फलस्य व्यापारानधिकरणशरीरवृत्तितया जीवनयत्नादावतिप्रसंगस्यापि समादितत्वात् तादृशफल
वृत्तेलक्षणस्य पर्याप्ततायामनःशरीरात्मकाश्रयावच्छिन्नत्वादन्वयव्यतिरेकावच्छेदकावच्छेदकाश्रयकत्वं स्वार्थस्य विशे

मञ्जू
प्रभा
पृ०
५२

२४

तथापरस्परान्वयोलिङ्गकं तत्सादृश्यघनपवनस्यान्तर्कार्यं पदं हूंपद्माकर्मकरणपदेकथा तु निष्पत्तेः पिनयोगिकेः मात्रा
दिम्रसंगात किं तु हेदेति सर्वसिद्धं हि स्वघपत्वविनिभावनालतिवायघामृतमित्साचाप्यवेतूरूपं नि तदनादेयं बीजमंत्रा
करोतीति करोति व्यवहारस्थ्को तासतविभागाव्याख्यातकत्वात् लोके हि निमृतप्रवकारेणेन व्यवहारानकर्तृत्व
वस्यासंभवाद्यानन्त्ये साहप्रपञ्चस्कमेदांशास्येवनकलं जंभदयेदिमाघमावविधौ विधर्ष्ये तद्के स्वसाधनत्वांशस्येव
वधात्वर्थांशस्मोपेणात्वयसंभवात् अस्तु वा न कलं जंभदये दिग्यबलवदनिष्टान्तु वषितमात्रस्य विधर्थता
दृष्टायमात्रस्पतज्जन्यतावतान्वयानुपपत्तिरिद्वारसंभवात् समानार्थकयोः प्रकृतिप्रत्ययोरेकोहेवह्व
इत्यादाविवप्रयोगस्यसाधुत्वार्थकत्वपानुहरादप्रत्ययेघटकरोतीत्यादिषु नान्तरैवमर्थनवायनदयस्यपत्वविष
यकयत्नस्यवाप्रतीतेः पौनरुक्त्येनान्वयासंभवात् घटं करोतीत्यादौ त्वार्थकतानुपपत्तिर्दोषः वस्तुतो यत्नार्थकधात्वर्थ
तावान्तस्यनयत्नोऽर्थः किं तु तदनुणाप्राग्यत्नमेवेत्युक्तमायेलनदनप्राप्यन्यप्रयोगोपपत्तेरिदानीं तल्लघुप्रसिद्धार्थ
शक्तिकल्पनशक्तेनरकल्पनापयुक्तत्वात् अस्तु वा तु कालत्वविशिष्टपत्नेशक्तिरावश्यकत्वात् नस्यपतिकरोतिजालात्पाक
तरस्यावेतनविषयकस्यवनस्यपत्वनांशमोघवशेनानुकूलत्यागाज्ञानेच्छाभावनादिबोधकत्वं यथा विशुद्धमानापि
तज्जन्यताविशिष्टसंगवेदाध्ययनादिकर्तृत्वावच्छिन्नशक्तेः श्रोत्रियपदमतत्याध्ययनादिकर्तृत्वविप्राद्यलोपशक्तं।
द्वितीयदलमोघवशेन विशुद्धमानापि तज्जन्यतामात्रेण ब्राह्मणंबोधयतीति एतेनव्यापारोधात्वर्थशक्यःप्राक्ष्या
तार्थस्तत्पादनासेवोत्पादकताभावनेसुष्टानेउत्पत्त्यनुकूलव्यापारइतिपर्यवसितं तत्रशक्तिग्राहकं पचतीत्यादेः
पाकमुत्पादयतीत्यादिविवरणं धात्वर्थव्यापारोत्पत्त्यनुकूलव्यापारश्चेतनावेतनयोः साधारणइति चेत्रः पचति

यम्पतेर्मानाभावात् प्रकृतपदार्थयोरभेदान्वयो नेति व्युत्पत्तिनियमस्यास्माकं तथ्याख्यानशालिनां च पृथक्त्वापत्तेरप्रयो
जकत्वात् नायं नियमः प्रामाणिक इति चेत् प्रातिपदिकार्थयोर्भेदान्वयो नेति नियमो यदि तथा इत्थं च नीलो घट इत्या
दौ समस्तस्थले नैव नीलादेर्घटादावन्वयसंभवात् नीलादिपदानां गुणिनि लक्षणावश्यकी अन्यथा पृथक्स्थविशेषण
विभक्तिः साधुत्वार्थेति सिद्धान्त इति चेन्न प्रातिपदिकार्थयोरभेदसंसर्गेणान्वय इति नियमस्य सामानाधिकरण्या
नुरोधेनावश्यकत्वात् सामानाधिकरण्यं ह्येकत्र संख्यान्वयबोधकत्वं नीलत्वपदार्थस्य गुणस्य समवायेन घटादावेव
न्वयोपगमे नीलपदोत्तरैकवचनोपस्थापितैकत्वसंख्याया अप्रकृतार्थे घटादावन्वयासंभवेन तदुक्तरूपतेः प्रत्यया
नां प्रकृत्यर्थान्वितस्वार्थबोधकताया व्युत्पत्तिसिद्धत्वात् नीलपदस्य गुणिलक्षकत्वे तु प्रकृत्यर्थयोरैक्येन द्वाभ्या
मेकवचनाभ्यामेकस्यैकत्वस्य नीलरूपवदभिन्नघटात्मकविशिष्टबोधस्य संपादनात् सामानाधिकरण्यमुप
पद्यते न चैवं विशेषणविभक्तिः साधुत्वमात्रार्थेति सिद्धान्तो भज्येत तस्या अपि संख्यार्थकताया आदरणादिति वा
च्यं नीलं घटमित्यादौ विशेषणविभक्तेरेकत्वमेतायधिकेति तदर्थस्य प्रथमायाः संख्यावाचकत्वस्य सर्वसिद्धत्वात्
न चाख्यातार्थसंख्यायाः प्रथमान्तपदोपस्थाप्ये प्रकृत्यर्थेऽन्वयप्रसंगान्नाद्भिन्नव्युत्पत्तिनियता आख्यातार्थ
संख्यातिरिक्तप्रत्ययार्थस्य प्रकृत्यर्थेऽपवान्वय इति संकोचादरे तु विशेषणविभक्त्यर्थसंख्यातिरिक्तत्वेन संकोचो वि
धेयवश्यमिति वाच्यं समानपदोपात्तभावनान्वयिन एवाख्यातार्थसंख्याया अप्रकृत्यर्थेऽन्वयप्रयोजकस्य सत्वेनता
दृशसंख्यातिरिक्तत्वेन संकोचे प्रामाणिकत्वात् इदं प्रयोजकविरहेण संकोचे मानाभावात् प्रकृत्याद्युपस्थाप्यार्थस्य
न्यत्र विकल्पतिविशिष्टस्य कर्तोनिराकांक्षतान्वयपि यः समभवः भावनायाः कर्मण्यन्वयमतेऽपि तत्त्वं क्रियायाश्च पदवाच्य

यत्कं नत्वधात्वर्थतावच्छेदकमथः संतापनस्यपूर्पादिपाकाद्वित्योग्यत्वावच्छेदकमावनियमेनस्यावत्स्याभावात् नचैवंफ
लावच्छिन्नव्यापारार्थकत्वादिविरहात् सकर्मकत्वानुपपत्तिरिति वाच्यं श्रुपति वैविक्षस्येवसकर्मकत्वाकर्मो
कत्वअवच्छापकत्वात् एवंक्रियात्वावान्तरजातिमत्त्वजात्यवच्छिन्नेगामिशक्तित्वद्रूपावच्छिन्नस्योत्तरसंयोगाव्यभि
चारितयाभावस्याभावात्त्रोत्तरसंयोगो धात्वर्थतावच्छेदक एव कः गमनत्वजातिरपि संयोगविभागजनकतांऽव
च्छेदिकाऽनुगतप्रत्ययप्रमापिता। यत्नेनतु शक्यतावच्छेदकं गुरुत्वजन्यतावच्छेदकतया यत्नानुगतताकारस्य
यत्किञ्चित्तया वासिद्धं कर्मत्वावान्तरसामान्यमेवनत्व अथः संयोगरूपस्यतदवच्छिन्नफलस्यपरिचायकत्वेऽप्यवच्छे
दकत्वादकत्वात्तत्तद्देशस्यकर्मत्वमिष्यतएव यत्नेनतु कर्मत्वमेवशक्यतावच्छेदकं न तु पूर्वदेशविभागफल
ककर्मत्वं सर्वेषां कर्मणां पूर्वदेशविभागजनकत्वेनाव्यावर्तकत्वात् त्यजतौ निरुक्तप्रयोगे केवलेनाऽदेशविभाग
फलकत्वबुद्धिनिमित्तंफलानुरोधित्वात्कर्मनाशाइतिसिद्धान्तः यत्तु कर्मत्वस्यशक्यतावच्छेदकत्वेऽस्यजिग
मिषोः पर्यायतापत्तिः कृताभिसारादिभिन्नगमनत्वस्य कर्मत्वावान्तरसामान्यस्याभिशक्यतावच्छेदकत्वेऽपि विशे
षस्तेनपर्यायतापत्तेरवतारात् यदपि विभागानुकूलक्रियैवत्यजेरर्थः अन्यथा व्रजात् संयोजनीत्यमेवमुक्तं मन
तिविगाइस्मात्प्रपादानतापत्तेः विभागस्यत्यजत्यर्थतावच्छेदकत्वेऽपिप्रवेशाद्वेनापादानतोऽधात्वर्थतावच्छेदकी
भूतएवविभागेऽपादानपञ्चम्याः साधुत्वादितितदपि मन्दं पतितकोऽस्मात्विकर्षाकोलावाकोदतयोः सुत्यजितिवैचित्र्ये
वोपपत्तेः सत्यामपिकर्मत्वापादानत्वविवक्षायां त्यजनयोर्हितौ यथायोग्यं प्रयोगः प्रागेव त्वाहितीयापापवोऽस्मतेः सुसमा
येत्वाहुः नचक्रियामात्रस्य त्यजिगम्याद्यर्थत्वेफलस्यधात्वर्थतानवच्छेदकतया धात्वर्थतावच्छेदकफलशालित्वक

रथो गच्छतीत्यादौ सर्वेषामाख्यातप्रयोगोऽस्त्वेव यत्ते जानातीत्यादावपि यत्नोऽस्त्वनुकूलव्यापारवान् ज्ञानो
त्पत्त्यनुकूलव्यापारवानित्याद्याकारकोऽन्वयबोधः आधारो यत्नो वा कापि नाख्यातार्थः संभवति मुख्यत्वेनो
ण तत्कल्पनस्यायुक्तत्वात् पाकं करोतीत्यस्मात् पचतीति विवरणात् करोतेर्यत्नोऽर्थोऽस्तु स्यादेतन्न चोत्पादयतीत्या
दौ धात्वाख्यातार्थयोरैक्यात्तयोर्न कर्मद्वेष इति वाच्यं तत्राख्यातस्य विशेषणविभक्तिवत्साधुत्वार्थकत्वोपगमा
त् एकोऽस्मदेतावपरोऽनपत्तेः संसर्गोऽन्वयस्तु न संभवति समयविशेषसंबन्धविशेषात्मिकाया उपत्तेरूपस्य संभवादेवं
मानमूलमनयोरुत्पादनातिरिक्तार्थकधातुतरस्मैवाख्यातस्योत्पादनार्थीनत्वतदर्थकधातुतरस्मान्मूलमभावाद्
तिस्थितं पचतीत्यादितो यत्नबोधस्त्वादेपादिति रत्नकोषकृताभिहितमपि निरस्तं कृताकृतविभागादिना ला
घवेन यत्नप्रतीतेरानुभविकत्वेन च तत्रैवाख्यातशक्तेरवधारणात् आक्षेपेणाप्यत्नप्रतीतावपि तत्र वर्तमानत्वादे
र्लतोः प्रतीतेरुक्तत्वात् किं चोत्पादनायाश्चाख्यातार्थत्वे वदतः संयोगो धूमज्ञाने घटस्य ज्ञानं वा जानातीत्यादि
प्रयोगप्रामाण्यापत्तिः चैत्रो जानातीत्यादौ समवायेन ज्ञानादिमत्त्वस्यैव प्रतीतेरानुभविकतया तदपलापश्च वदं
जानातीत्यादिवाक्यार्थबोधोत्तरं रवद्ज्ञानमत्र चेति संशयापत्तिश्च दोषः ज्ञानोत्पादकत्वादिनिश्चयस्य ज्ञानादुत्प
त्तेरुत्पादित्वविरोधिताविरहिति इदमत्रालोचनीयं पच्यते तण्डुलः स्वयमेवेत्यादौ विक्लित्त्यादिकफलमेव धात्वर्थः कि
ञ्चैत्रादिसमवेतं तादृशधात्वर्थस्य फलात्मकत्वे यानदीयफलाभावादकर्मको धातुरेकत्वे सकर्मकस्तस्मात्त्वया
र्थः कर्मकर्तृयोः सिद्धान्तितत्वात् कर्मवद्भावानुशासनेन तु पश्यादिना पदसाधुतामात्रस्यार्थेन तु कर्मतां कर्त्रादि
नियमनाय चैत्रः पचत्योदनमित्यादौ रूपादिपरस्मैपदेऽनियोगपाधः स्ततापनादिकमर्थो धातोर्यत्नस्योत्पादनत्वपरिचा

महा
प्रभा
पृ°
५४

धर्मभवात चितं पजनेः स्यादेरणीयुत्वात् पवृत्तनपत्वाराधनस्प्रभालेःस्यादिरुबोधं भक्तित्वं नेत्रपमाराधः
माद्याकारकत्वानङ्गीकर्मोनसत्त्वआप्योजातिविशेषः स्यादेतन्मीनेः सुखात्मकतयाभगवतितद्भावादिति
तत्प्रयोगयोग्यत्वमनिवार्यानित्यसुखाभ्युपगंतुनघेष्वितदीयसुखस्याप्रयोजकत्वात्तथा अप्रकेचिदाहुः
एतत्कर्मतापद्यलेप्रीतिप्रयोजकत्वाशयनियोगेनभक्तिप्रयुक्तक्रियैवधातोरर्थः विषयतात्मककर्मत्वम
त्वावत्वेति निष्प्रतियोगिकपदार्थैकदेशोपराणोनत्यमग्नासुखनन्दत्वाद्दिनिवदंति अन्येतुप्रीतिरनुरक्तिः साच
भगवद्विषयिकाराधकनिष्ठक्रियाफलविषयतात्मकमेवकर्मत्वमुभयत्रान्वेतीतिसमंतादर्थात् मिश्रात्प्री
तिःसुखविशेषवत्प्रयोजकत्वेनयोग्यत्वंभगवदाराधनेप्यवाद्द्वेतमक्तिप्रयोग्यत्वेतूपलक्षणेनतद्विशेषणप्रीति
योग्यक्रियात्वेनैवबोधादित्याहुः तत्रसाधीयः योग्यत्वप्रवेशोप्ययोग्यत्वानिरासाद्येयतात्मकस्येश्वरीय
कर्मत्वस्यप्रीतौबाधात यच्चिदानंदमयत्वादित्यंतेर्भगवत्प्रीतित्वसुखविमत्वेवतिवोद्ध्वाधिकारविकृतोदीपिति
कृत्वानुमोदितमदमनेप्रामाणिकंतदेश्वरहितितस्यसुखविवाधायोग्यतामतेनमिश्रेकिरोपसाधीयतीनचसुखस
त्वपितदीयजनकत्वाःप्रसिद्धाःयोग्यतेइवरमेवेतिवाच्यं व्यापकत्वेमत्वनेमथापिसिद्धत्वस्वरूपयोग्यतायाअव्याप्ता
तान् नचभोजनादिजसुखेव्यभिचारव्यापकत्वमपीतिवाच्यं सुखानस्यसुखविवेचनेनोपायमानत्वद्विनेसति
व्यापकतायाअव्याप्तात्तदनुपपत्तेर्यिकाराणात्मअवदितोनरविशेषितस्यकार्यतावच्छेदकसंबंधीकार्यतया
व्यापकत्वाअव्याप्तात् नचकारणताघटकव्यापकताघटकापिकारणतायाकार्यमवदितस्यैवतणावच्छे
दतायाअवच्छेदकतयाव्यवहितोतरत्वसंबंधव्यक्तिभेदभिन्नसंबंधत्वदितिचेन्नतिनसुखविषयतस्यप्रतियोगिव्यापक

३०

कर्मत्वमिति निर्वक्तुमशक्यत्वेन क्रियाजन्यफलवत्त्वं कर्मत्वमिति निर्वाच्यं तथा च पतनस्पर्शफलजनकस्य विभा
गात्मकफलाश्रयतया कर्मत्वेन वृक्षात्पर्णं पततीत्यादावपि पत्राद्वृक्षादिपदोत्तरं द्वितीयापत्तिरिति वाच्यं पति
कर्तृत्वोक्तिवच्च तत्रैव विभागरूपकर्मकालाक्रान्तयोगस्य तेः एवं यजतिददातिप्रभृतौ स्वादीनां नेदं समं स्या
त्कारकस्यानविशेषात्मकस्यापि योगे तथा ज्ञाने विशेषस्य विषयविशेषनिबन्धनः फलविशेषजनकत्वं च वेदकोऽ
जेदत्र मित्र्यादौ मीमांसादिमानसम्मतत्वप्रमाणितः फलविशेषजनकत्वं तु न धात्वर्थतावच्छेदककोटिप्रविष्टमो
दनादेव तानि रूपितस्वत्वजननद्वारा स्वस्वत्वजनकत्यागत्वं च यजत्यर्थस्य परिचायकमात्रं एवं संप्रदानत्वी
कारपूर्वकस्वस्वत्वध्वंसद्वारा परस्वत्वजनकत्यागत्वं ददात्यर्थस्य देवतोद्देश्यककर्मदेयफलकत्यागत्वं यजत्यर्थः
पुरोडाशेन यागं कुर्यादित्यादौ यजत्यर्थानन्तर्भावाद्याः पुरोडाशकरणकत्यागानन्तर्भावसंगानात् किं तु यज्ञसाधनत्वमपि
प्रयुक्ताश्रीतिप्रयोजिका क्रिया विषयत्वेनापेक्षते च द्वितीयार्थो भक्तिप्रयोजकत्वेति तेन नारायणविषयककर्मक्रि
प्रयुक्तनारायणवृत्तिप्रीतिप्रयोजिका च भक्तिर्यागरूपक्रियाजन्यफलत्वं निरूपितवृत्तित्वविशेषः न
चैवं विनापि पुष्पाद्युपहारेणनारायणप्रयोगप्रसिद्धाया यनिविनिवारितं यागं विनापि नारायणप्रीतिप्रयोजकक्रि
याया अपि संभवात् तादृशप्रयोगस्याप्रमाणत्वात् पर्यवसानं प्रकृतयागस्य तत्प्रयोगाभावात् संसर्गकरणत्वमा
गात्वं प्रीतिप्रयोजकत्वविशेषितं दर्शितन्यायेन तज्जन्यफलत्वं च प्राधान्यापत्तेर्वसिनकर्मत्वं द्वितीयार्थः पुष्पेण
नारायणयोः भेदः तथा च नारायणवृत्ति प्रीतिप्रयोजककोटिप्रविष्टकरणकः पुष्पाभिन्नद्रव्यत्यागजन्यफलाश्रयत्वाकार
कोबोधः इति तन्मते अप्रसिद्धकरणत्वेऽपि पुरोडाशादेर्यागात्पूर्वं तादृशप्रयोगस्यानुभविकत्वमाहुः अप्येतत्

म॰दी॰ प्रमा॰ श॰ ५५

याद‍ृच्छिकतृणादिप्रक्षेपे तद्वारणाय मंत्रकरणकत्वविशेषणमिति केचित् तन्न प्रकृते अमंत्रके प्राजापत्यहोमेऽव्याप्तेः
होतीति प्रयोगस्य प्रामाण्यानुपपत्तेः नचतत्रापि मंत्रकरणकत्वमस्त्येव प्रजापतये मनसा चिन्तनस्य तत्करणत्व
विधानात्तस्यैव मंत्रतायाः सुवचत्वादिति वाच्यं वाक्येतरस्य मंत्रत्वासंभवात् किंच करप्रसारणादेरपि हुतत्वे
नायोरपत्तया वह्नौ हुतं जुहोतीत्यादौ दर्शितान्वयानुपपत्तेः हुतत्वेतः पतनस्य वह्न्यधिकरणकत्वाभावेन हुतत्व
होतीत्यादावप्ययोग्यतापत्तेश्च परंपरासंबंधस्यातिप्रसंजकत्वात्तन्निप्रसंजकपरंपरानियमनसंभवेपि तादृश
क्रियाया वह्निस्थितित्वान्वयस्य निरर्थकत्वात् एतेनाग्निसंयोगोत्पत्त्यनुकूलतादृशक्रिया जुहोत्यर्थः अग्निसंयो जनक
गजनकयत्नत्वमिति पतनजनकतदनुकूलमंत्रकरणकक्रियानुकूलयत्नवानित्याद्याकारको हुतं जुहोतीत्यादिवा
३ क्यजो बोधः नैवं धात्वर्थतावच्छेदकसंयोगात्मकफलशालितयाग्नेः कर्मतापत्त्याग्निं जुहोतीत्यादेः प्रामा
ण्यापत्तिरिति वाच्यं तत्र साक्षाद्धात्वर्थतावच्छेदकतायाः प्रवेशाद्धात्वर्थतावच्छेदककोटिप्रवेशमात्रेण फलस्य कर्म्मतापाद
कत्वात् अतएव गमने लोष्टस्खलितपतितस्यादौ गगनादेर्धात्वर्थतावच्छेदककोटिप्रविष्टसंयोगात्मकफल
क्रियानुकूल वत्त्वेपि न कर्म्मत्वमन्यथोर्द्ध्वसंयोगानुकूलव्यापारस्योत्पत्तेरपि सत्त्वेन यातेर्गानिप्रसंगस्य दुर्वारत्वापत्तेः
न च कर्म्मत्वावान्तरसामान्यन्तु द्वेषणत्वमेव तत्र धात्वर्थतावच्छेदकमतः फलस्यानवच्छेदकतया नातिप्र
लरूपविशिष्टे लक्षणाया आवश्यकत्वेऽपि हरिपदस्यानन्तानार्थताहानिः अथवा सर्वज्ञानानि हरिरित्यादाव
पि शरीरमेव हरिपदार्थः नित्यज्ञानस्य कालिकाव्याप्यवृत्तितावि रहेऽपि दैशिकाव्याप्यवृत्तितायाः स्ववचनमावच्छे
दकत्वस्यात्मत्वार्थतेनायोग्यताविरहात् शरीरे ज्ञानं न तु शरीरस्यावच्छेदकतासाधकप्रतीतेरन्यथानुपपत्ति
त्यज्ञानमपि विषयीभूयमानतो बाधकाभावादन्यथा तज्ज्ञानादेरपि दैशिकावच्छेदकतास्ति ह्यप्रसंगात् एवं च
तच्छरीरीयत्वेऽपि प्रतिनियतं तेऽवच्छेदकतासंसर्गेणाकारणत्वमप्युपपद्यते अन्यथा तन्न तिप्रसक्तमनुष्ठानं वृथा दीपोऽर्थवत्वमेवस्यात्
तथा च विष्णावपि हरिपदस्य शक्तिरेव सर्वज्ञकपिलरूपविशिष्टे त्वारत्वानुस्त्या लक्षणा न तावता प्रकृतदतिरिक्तिवोध्यं विवर
णादिति प्रयोजकत्वप्रयोज्यत्वं वा पंचम्यर्थः शक्तिग्रहान्वयी तद्वानुमानद्वारा गृहीतकलशपदशक्तिकस्य हि घटो लीन
स कलशोऽस्तीति विवरणमाकलयतो घटपदं कलशे शक्तं कलशपदप्रतिपाद्यार्थप्रतिपादकत्वात् इत्यनुमानजन्येति द्वेन
ग्रहोऽप्यनुमानात् घटपदं कलशपदप्रतिपाद्यार्थप्रतिपादकं स्वसंकेतेन बोधेऽप्रयोज्यो वा वारणविषयकलशपदकत्वादित्याया
कारकानन्दतनुद्वेतद्धहः प्रकरणाद्यधीनवक्तिकाग्रहादिमूलकः एतेन विवरणस्य शक्तिग्राहकपदार्थघटितत्वात् ग्राहकत्वं
दर्शितं हेतुप्राहकत्वं च कथमित्याकांक्षा कोटिता एवमन्यत्रापि एतदेवोऽभि... येन्यविवरणस्यापि शक्तिग्राहर्थपदसमानाधिकरणरूप

राम

शक्यत्वं यवमयश्चरुरिति वाक्यशेषाद्दीर्घशूकस्य यवपदप्रतिपाद्यतया तच्छेषभूतवसन्तसमयादिवाक्यस्य च यवपद।
प्रतिपाद्यतया च लिङ्गेनानुमीयत इत्यर्थः कङ्गौ तु तदप्रतिपाद्यतया लिङ्गेन प्रसञ्जनं तच्छेषत्वाभावो निर्णीयत इति।
भावः एवं सति कङ्गौ न दीर्घप्रयोगाप्रयवनस्यादित्यत आह कङ्गाविति ननु नानादेशवाक्यशेषप्रतिपाद्यत्वेन कङ्गौ
शक्यत्वाभावसाधकवाक्यशेषवद्यवदृष्टस्यापि शक्तिग्राहकतया तत्सिद्ध्योः स्पष्टवीरत्वादित्याशङ्क्य बाधकस
द्भावान्न तच्छक्यतासिद्धिरिति समाधत्ते नानाशक्तीति यदि लाघवादेकस्मिन्नेवार्थे शक्तिः सिद्ध्येत्तदा नानार्थ
ता नानार्थतावलीयेतेत्याशङ्कते यत्तु नानार्थतानुपपत्तिरिति तत्र दूषयति विनिगमकाभावादिति कोऽयमस्य
शक्तिग्राहकस्य साधारण्यादिदं तु वाक्यशेषस्य विनिगमकत्वाद्युक्तमिति भावः अथ हरिपदार्थो न शरीरवृत्तिजातिवि
शेषविशिष्टः हरिर्जीवात्मनि सर्वेभ्यादौ प्रामाणिकप्रयोगो योगरूढताप्रसङ्गात् नैवं छेदकत्वेस्याख्यानार्थतया ना चा
योगरूढत्वमिति वाच्यं नदीपङ्कजानत्यनिमित्तेन न्यायव्युत्पत्तितया नदीयावच्छेदकतानिदानं योगरूढतानुपपत्ते।
न च स्वसमवायिसमवेतत्वं स्वसाधारणकारणकचेष्टावत्त्वमात्मत्वतार्थो वाच्यः इति यौगरूढत्वमिति वा।
ख्याता च्यं तावतस्यैव तस्यार्थतायां गौरवात् किं तु स्वसमवेतचेष्टासाधारणकारणं कं सिमत्व सूक्ष्मशरीरवृत्ति
जातिविशेषावच्छिन्नत्वादर्शितं प्रयोगे समवायस्याख्यानार्थत्वेनैव योगरूढत्वोपपत्तेरेवंवत्सिद्धादावपरार्थी।
सिंहत्वादिजातिस्वत्वनवच्छिन्नावच्छेदकताकशक्तिः कस्यचित्विषया हरिशरीरवृत्तिजातिविशेषावच्छि
न्नेति तु न शक्तिर्गौरवात् नीलविशिष्टे नीलपदस्येव सति बाधके कोशस्य शक्तिग्राहकतायाः प्राप्त्यसत्त्वात् तथा
च विनिगमकाभावादिति नानाशक्तिकल्पनमिति चाप्युक्तं न च नानार्थत्वे नानाशक्तिमत्त्वेन तु नाना शक्तिमत्त्वं

गदा
प्रमा
शु°
७२

48

कः अगृहीतत्वविषयीकृतं विशेषणं यथा तथाभूता विशेषणता विषयिका तादृशी बुद्धिर्विशेष्यं विशिष्टं विषयीकरोतीति विशिष्टवि-
षयकत्वं विशेषणविषयकत्वनियतमिति यावत् विशेष्यान्वयिन्यां त्वयितं विशेषणतत्त्वं ततो विशिष्टांशे भासमानस्य विशेष-
णांशेऽपि भानमावश्यकमिति फलितं प्रकृते चागोत्वादिविशिष्टशक्तिमत्वग्रहात् समानोऽपि गोत्वादावपि तात्पर्यग्रहात् तदंशे
यद्यपि विशेषणीभूतव्यक्तावपि तस्याः सिद्धिरायाति ततः प्रसज्यते तथापि शाब्दबोधादिकारणतावच्छेदककोटौ विशिष्टभवे
शेषो खाद्विशेषणमात्रं निवेश्यते लाघवादिति शातत्वेन तदंशावच्छेदकताया: शक्तता नियामकत्वमपि विशेष्यांशे साध-
कविरहाद्विशेषणमात्रे विश्राम्यतीति हृदयं एतेन तत्तत्पदजन्यशाब्दबोधविषयत्वं तत्तत्पदशक्यत्वं व्यवहारमाणे रीत्या व्यक्तेरपि
शाब्दबोधे भानात् तत्र विशिष्टमित्यपि प्रत्युक्तं शाब्दबोधजनकतावच्छेदकशक्तिविषयतानिरूपितविषयताया: शक्यता-
नियामकत्वाद् दर्शितविषयतायाश्च तद्घटितत्वादन्यथा तन्तः शाब्दबोधादेश्च शाब्दबोधभानस्यावश्यकत्वात् तत्रापि शक्तिसि-
द्धिप्रसंगात् एवकारव्यवच्छेद्यं संगमयति किं दर्शयति नलिमादिना अभिचारादिति विशेष्यता विशेष्य संसर्गेण शाब्द-
बोधं प्रति विशेष्यता विशेषणसंसर्गेण शक्तिज्ञानस्य कारणतायावत् तद्घटनमापाक्तिग्रहाद्विशेष्यगवादेरपि शाब्दबोधोदये
तत्र व्यभिचारादिति भावः ननु गोशाब्दबोधं प्रति गोविशेष्यकगोपदशक्तिज्ञानत्वेन कारणं समवायः सम्बन्धतिरिक्तात्म-
निष्ठतया कार्यकारणभावनिर्वचनेन न व्यभिचारः अगृहीतशक्तिकगोव्यक्तेः शाब्दबोधभानेऽपि ततः पूर्वक वि[illegible] विश-
क्तिग्रहस्यावश्यकत्वादित्यतो बाधकान्तरमाह आनन्त्यादिति एकस्यां व्यक्तौ विनिगमनाविरहेण विश्रामयितुम-
शक्यत्वात् सर्वासु व्यक्तिषु शक्तिकल्पने व्यक्तीनामनन्ततया तत्तद्व्यक्तीनामप्यानन्त्यमापतेदित्यर्थः यत्र कस्यां-
चिद्व्यक्तौ शक्तिः कल्पनीया सर्वासु व्यक्तिषु वेति विकल्पद्वयमेवाध्यकमाह अभिचारादिति द्वितीयमानन्त्यादि-
ति इति कश्चिद्व्यर्णयति तदसत् सर्वासु व्यक्तिषु शक्तिसत्वे अगृहीतशक्तिकव्यक्तौ व्यभिचारानुद्धारेण प्रथमदोष-
स्योभयसाधारण्यादिकल्पासंगतेः दर्शितरीत्या कार्यकारणभावनिर्वचनेन प्रथमविकल्पस्य न वतारात् ॥

त्वादित्यभिप्रेतमिति॥ ननस्य ग्रन्थार्थकेति विवरणीयघटं तदर्थः ओदनो भ्रमस्य करोतीति द्वन्द्वौ विवरणत्वावच्छेदकघटं
तदेवेति विवरणीयपदान्यपदेनेत्यर्थः तृतीयार्थोऽभेदः कथन्तान्वयीत्यर्थकत्वेन विवरणीयपदप्रतिपाद्यार्थप्रतिपादक
शब्दः कलशो घटो नेनेत्यत्राभेदे तृतीयाद्यमालिकाहिविवरणादित्यर्थः आख्यातस्य यत्नार्थकत्वे लाघवमिति विवरणस
यिस्रादेपदे मिश्रतिपादयितुं विवरणान्तरमाह यत्नेति यत्न एव तीत्यादिना अनेनेत्यादिकं दर्शितार्थकं प्रसिद्धपदेति निर्णीत
र्थकपदेत्यर्थः सान्निध्यमभिव्याहारः सद्गमिति करणभावो साकांक्षमित्यर्थः क्रियाविशेषणमेतत् अत्र कश्चित् रोतीतिरितिडं ताध्वा
वहि नैमित्तिकेसंस्कारतराविति समभ्यर्हार्थे प्रसंस्कारतत्र इति तस्य विशेषतयान्वयेनात्मन्येव भावार्थं तिङः येऽत्र तत्र विशेष्यको ऽप
रान्वयबोधोऽनुमत इति किञ्चित्तान्वेदं शक्तिग्रहोदाहरणं सुचिन्त्यमिति शाब्दबोधः सूदस्य पचतीति द्विजो ऽयमेतीति निहित इत्या दोषमूलान्वयपचन
कर्तृत्वावच्छिन्ने निरिति तादविधेयतया त्वयदर्शनेन बुभिचारावदर्शितत्वात्तो नियमङत्वदावइति समादध्वनदेतद्दोषे प्रल्पितमेव
सद्कारस्त्विति तस्येति उपशेषमिति तावच्छेदकतया त्वयेवाधकाभावेनदर्शितत्वात्पर्यावधारणं साधमतत्वाद्वेवपद्यस्य भ्रममूल
कत्वात नचकारकसमभ्याः क्रियान्वयस्यावश्यकत्वापेक्षाः न विना सिद्धे विशेष्यतावच्छेदकतमसमवच्छिन्नकतदर्थस्येतिवाच्यं त्वात्
मोदनो भवतिस्यात्तामोदनं पचतीत्यादौ कारकस्यान्वयितत्वपरंपरयाक्रियान्वयित्वेन कारकसमभ्याः साधुत्वदर्शनेन आपितत्वाद्वाधकाभाव
त अन्यथा विधेयतया तदर्थान्वयोक्तावप्यगतिरेवतत्वस्मात एवंबोधः सूदस्य पचतीति द्विजो ऽयमेतीति निहित इत्यनन्तं त्वछेदेन स्यात्तस्यादिति
जपरामर्शोत्तरभ्रमस्यैव विशेष्यतावच्छेदकत्वेन लिङ्गत्वं तेनाभिहितत्वेन अभिहितारविरहाद्दर्शितस्थलं तिन्निपमव्याद्भासोपसंस्थविभ्रमसूलक
मितिदिक् अभिहितोऽशक्तितद्धरोपायाविदानीमप्रसंगात्कथंतन्निरूपणीयं तत्रवादिपदशक्यविज्ञानि मास्तुहतिजवाजातिमद्धापक
पदशक्यतपदशक्यत्ववाजातिमिश्रत्वेनवेतिविप्रतिपत्तौ मत्वाह तिजातघटादिपदार्थं इतिसूत्रेण महर्षिदर्शितजात्यादिविशिष्टव्यक्तिशक्ति
लिपरमतनिराकरणपूर्वकमुपपादयितुं मीमांसकमतं प्रथममुपन्यस्यति तत्रजातविन्यादिना तयैत्र शक्तिग्राहकेषु जनकतया भवे
तु शक्तिग्रहो जाता वेव जातिविशेष्यकत्वेवेत्यर्थः यद्वानसत्त्वादग्रतापयीनशक्तिग्रहे शक्तिके विहृतंतीति पोजनत्वाह्यारो शक्तिग्रह
इति विशिष्टशक्तिग्रहे शक्तिप्रदेविशेषघटेशक्तिरावश्यकीनाशदीतविशेषणाग्रहे विशेष्यमधिगच्छतीति न्यायात् तद्वानिरवच्छिन्नाधि

ले

यत्र कोऽपि दोषः अन्यवच्छिन्नज्ञातित्वविषयतायाः कार्यतावच्छेदकतया तस्याश्च समवायावच्छिन्नत्वनियमेनोक्तनियमेनचार्थज्ञानं स
स. सू. मवायावच्छिन्नगोत्वादिप्रकारतानिरूपितगवादिविशेष्यताकबोधनिर्वाहः नच गवत्वादिविशेष्यतानिरूपितजातियोगोत्वप्रकारतावन वच्छि
सू. न्नमप्रकारतायां व्यभिचारो नोवदर्शितनियमोऽपि संवर्ततीति वाच्यं तन्मयप्रकारतायाउपलक्षणभेदोपलक्षणतदर्शितात्वतरप्रयोज्यताविरह
७३ त्ववस्तुतोः यथाऽस्मन्मते गमेवगवयादिविशेष्यतानिरूपितानवच्छिन्नगोत्वादिप्रकारतालौकिकेवेति कुत्र व्यभिचारशंका एवंप
त्वादिघात्वर्थेतांशुरुत्वप्रयोज्यपतनत्वादिज्ञानस्वावच्छिन्नबोधकतया ताहशज्ञानाविवशास्त्रिकीगोस्पादीनामपिदिगमनत्वादिज्ञानस्वाव
च्छिन्नबोधकत्वं तदाहशताहशज्ञानौ यदि तु संयोगावच्छिन्नक्रियात्वादिनातत्तो बोधः शाब्दिकस्तदा संयोगत्वक्रियात्वादौ खंडशः शक्तिर्द
५१ र्शितरीत्या प्रत्यमानेन परस्परं तदन्वयाद्विशिष्टलाभः वस्तुतस्तु संख्यानामप्यत्र क्रियात्वगतित्वादीनां जातित्वासंभवात्स्तु सं
योगाद्यवच्छिन्नक्रियात्वत्वादिना शाब्दिकल्पनेगौरवात् क्रियात्वसंयोगत्वादावखंडधर्मे खंडशः शक्तिर्ज्ञानाद्वेव शक्तिरित्यन्या अत्र श्रे
तिपदस्याखंडधर्मपरत्वादविरोधः अतएव ज्ञात्यादौ तत्स्मन्तु पराभ्युपगमातिविशेषाद्विपदानां जाति शाक्तत्वासंभवादवधारणासं
भवत्वक्षपिप्रसक्तमखंडधर्मस्य शक्ततायास्तत्रापि स्तुवचत्वात् यत्तु संयोगाद्यवच्छिन्नक्रियात्वादेः सखंडतयात वच्छिन्नप्रकारतासं
भवेन ताहशक्रियात्वत्वाद्यवच्छिन्नशाक्तताज्ञानत्वेन कारणताकल्पने गौरवात् ताहशक्रियात्वाद्यवच्छिन्नएवगमनादिशक्तिर्लौ
च्यवादिति तत्तुच्छं ताहशक्रियात्वावच्छिन्नशक्तताज्ञानत्वेन कारणतायामप्यवच्छेदकतावच्छेदकतायास्ताहशक्रियात्वत्वा
दावावच्छपकत्वेन लाघवासंभवात् यदि च संयोगानुकूलत्वविशिष्टक्रियात्वं तावच्छेदकतावच्छेदकं किंतु संयोगानुकूल
वच्छेदकं ३ त्वं क्रियात्वं चोभयमेकत्र ह्यमिति रीत्याऽतत्क्रियात्वस्याखंडस्यानवच्छिन्नावच्छेदकतासंभवाल्लाघवमिति तु चमनेतदानुलम्यतागवादि यु
पदानामपि गोत्वत्वाद्यवच्छिन्नशक्तिकल्पनापत्त्यालाघवेनानवच्छिन्नगोत्वादिहृत्यवच्छेदकताकव्यक्तिशक्तिसिद्ध्यापत्तेऽनुरूपेण
गुरुत्वेन तस्याद्यशक्तिमात्रे त्वदोषाणामपरिच्छन्नानुगताखंडधर्मे शक्तिः कल्प्यते शक्तावच्छेदकताऽनवच्छिन्नताने वस्तुमदेतत् तु यं

शक्ति

उद्भूतजातिशक्तिज्ञानाद्यत्रैभानं नोपपद्यत इति निरूढं यत्पञ्चत्रयी प्रभाकरसिद्धान्तरीतिः तथा हि गोत्वादिजातिशक्तिज्ञाने गोत्वादिप्रा
कृत्वावच्छिन्नत्वमस्त्येव कारणं ज्ञानलिङ्गादाख्यपयोस्तुल्यवित्तिवेद्यतानियमाज्जातिशक्तिबोधेऽन्यमानेऽस्य केऽपि मानं नच समवायेनैव
संबन्धान्तरेणापि गोत्वादिप्रकारकः शाब्दबोधो गोत्वादावुपयत्तां गोत्वविषयकशाब्दत्वमात्रस्य गोपदशक्तिज्ञानकार्यताव
च्छेदकात्तथा संसर्गविशेषभाननियमेन तत्सामग्र्यभावादिति वाच्यं प्रकृतावच्छिन्नगोत्वादिविषयताया एव कार्यतावच्छे
दकत्वात्तादृशविषयतायाश्च समवायावच्छिन्नत्वनियमेनार्थतः समवायावच्छिन्नभानसिद्धेरन्यथा धर्मान्तरावच्छिन्न
गोत्वादेर्भानं स्यादिति स्यान्न्यायविचारे तत्र संशयीय वचसो वकाशस्य गत अथ तुल्यवित्तिवेद्यतया जातिबोधे व्यक्तिभाननियमो नतावत् ति
तद्व्यक्तिजातिविषयत्वं तज्जातिसमवायिविषयतानिरूपितनिमित्ताकारकः गोत्वं जातिः प्रमेयमित्याकारकबोधीयावच्छि
न्नगोत्वादिविषयतायां व्यभिचारात् नापि विषयतस्थले प्रकारत्वं निवेश्यतयानियमः शाब्दनिर्वचनः कालोगोत्ववानि
त्यादिज्ञानीयगोत्वादिप्रकारतायां कालिकादिसंसर्गावच्छिन्नायां व्यभिचारात् तावतापि गोत्वादिमुख्यविशेष्यकशाब्दबोधे
वच्यकाभावेन व्यक्तिभाननियमासिद्धेश्च एतेन यदनवच्छिन्नगोत्वादिजातिप्रकारत्वं तन्निष्ठसमवायिव्यक्तिविशेष्यतानि
रूपितमित्यस्तु नियमः गोत्वमित्याकारकज्ञानीयविषयतायां प्रकारतात्वविरहेण कालोगोत्ववानित्यादिज्ञानीयायास्त
स्याश्चावच्छिन्नत्वेन व्यभिचारविरहात् नच गोत्वेन संज्ञातास्मीत्याकारकीयोर्थानिस्पाकारकानवच्छिन्नगोत्वविषयताकज्ञा
नप्रत्यक्षेणानवच्छिन्नगोत्वप्रकारतायां व्यभिचार इति वाच्यं तत्रापीदमंशे विशेषणतापन्नोऽपि विशेष्यतावच्छेदकत्वविशेषणता न्ये
यां गोत्वविशेषणतायाः स्वाधेयत्वसंसर्गावच्छिन्नत्वानवच्छिन्नत्वादनवच्छिन्नत्वादनवच्छिन्नजातिप्रकारतायाः समवाय
वच्छिन्नत्वनियमादित्यपि निरस्तं जातिशक्त्याऽऽसमानतास्वरूपबोधे व्यक्तिभाननियमासिद्धेर्विरहे वेदृश्यते लौकिकसंनि
कर्षपरम्परानरपेक्षोऽनवच्छिन्नजातिविषयतासामान्ये स्वाश्रयसमवायित्वविशेष्यतानिरूपितत्वनियमस्यादरणीयत

म.ल.
प्र.आ.
पृ
७४

50

र्थत्वात् प्रकृते गोत्वस्य कारणतायामेकत्रावच्छेदकत्वाच्च समस्तिरिच्यते गोत्वत्वप्रवेशस्य गोत्वशक्तिज्ञानत्वघटकतयोभयत्र न।
वाच्यत्वव्यापकत्वादित्यदृष्टेति तदेतदनुपपत्तेरपसाधारणेन लक्षितभानमुपपादयति लक्षितं विनेत्यादिना। लक्षितभानं विनेत्यर्थः अ
सम्भवादिति दर्शितक्रमेण लक्षितभानप्रयोजकसामग्र्याः शक्तिभानप्रयोजकत्वांशे सामानाधिकरण्ये शक्तिभानस्यापरिहार्य
त्वादिति भावः केचित्तु प्राभाकराः गामानयेत्यादिषु तत्पदवाच्यस्य वर्णाधीनगवानयनप्रवृत्यनुमितं गवानयनं ज्ञानं तादृश
वाक्यार्थीनतयावधृतं मुक्तपित्रत्ताचाक्यार्थीनेच बोधेपदोपस्थापितत्वं वा न्वयप्रतियोगितया भासते तस्यानिमसंगानत
च्यापि पदोपस्थापितं तेहस्यापदजन्योपस्थितिविषयत्वमिति तिस्मवस्थापितं पदं च कस्मोवृत्तिविरहेः त्वयमतियोगितया तं
तासंभवादवश्यं व्यक्तिरूपेणायेवं प्रथमान्तपदेन वृत्त्योपस्थापितस्यैव वस्तुत्व विशेष्यतया शाब्दबोधे भानमिति सिद्धं तितत्वे
तरोगिच्छुनीत्यादौ व्यक्तेः सुखविशेष्यतया भानस्यासम्भवादनुपपत्त्यापि व्यक्तिरूपाकृतिरूपयोरभिप्रेत्य रूपयति शक्तिं विने
ति व्यक्तिभानानुपपत्तेरिति वृत्त्यापदजन्योपस्थितिविषयस्यैव शाब्दबोधे भाननियमादिति भावः यत्तु जातिर्वा तेतु
त्वविशिष्टवेधनतयाव्यक्तिभाननियमांगीकारेण गोत्वादिशक्तानाने शक्तं योगवादेरपिभानस्यावश्यकतया शक्ति ता
नविषयतात्मकं शक्यत्वं व्यक्तेरपि दुर्निवारमिति केचित्तु पातं दूषणं तन्मन्दं शक्तितानेव्यक्तेर्भानेपि शाब्दबोधजन
कतावच्छेदकशक्तिविषयतानिरूपितविषयतात्मकदर्शितशक्यतायास्तमभ्यपेतत्वविषयतायाजनकतावच्छेद
ककोटावप्रवेशात् शक्तिविषयतानिरूपितत्वाच्च परंपरयानिरूपितत्वस्य वर्जं शाक्यत्वेपि तादात्म्यनिरूपितत्वस्य प्रवेशनी
यतयानस्याकिंचित्करत्वात् किंचान्वयबोधेलौकिकसम्बन्धयोरेवतुल्यविषयतयाभानस्यानियमाणिपितुं शक्य
तयानुमित्याद्यात्मके शक्तिग्रहेव्यक्तिभानावश्यंभावोपालंभानवकाशात् यदपि अनुमित्यादौ पदनधार्मिकसाधर्मिवि
षयकत्वादेः परामर्शादिप्रयोज्यतादर्शनेन तन्मन्तज्ञानविषयतासामान्यकारणप्रयोज्यमिति नियम्यतेन तदर्थमेवानुमि

वरीमितोगत्वादौगवादिपदशक्यतावच्छेदकांशप्रवेशे गौरवात्. एवं शक्तावप्यविशिष्टा यस्मादिपदानां नुप्रकृतात्यवच्छिन्नशक्तिरेवो श॰क्ति॰
पेयापस्त्वत्वादेर्लोमलांगूलादिस्वरूपतया न शक्तिकल्पनेन दाम्ना यथा नानिर्धार्ज्ञानं भानप्रवत्तुल्यवित्तिवेद्यतया शक्तिभानोप
गमात् लोमलांगूलवान् देशगृत्यादिज्ञानेव्यभिचारेण लोमलांगूलादीनामाश्रयतुल्यवित्तिवेद्यतानियमस्यवक्तुमशक्यत्वात् न
चलोमत्वलांगूलत्वादिजातिरूपं एवं शक्तिरूपमाश्रयतया तुल्यवित्तिवेद्यतानियमेनव्यक्तिभानस्तिवाच्यः शक्तो पपादरूतिवाच्यं तावता
लोमत्वलांगूलत्वाद्याश्रयभानसंभवेपिलोमलांगूलाद्याश्रयभानानिर्वाहस्यापरिहार्यत्वात् लिङ्गादिपदानामपि कार्य्यतात्वादि म ५
वच्छेदप्रवृत्तिशक्तितुल्यवित्तिवेद्यतयात दाश्रयभानाभिमतोपगमेकार्यतादिभानसंभवेपि कार्यादिभानेनसंभवतीति कार्य्यतादि
विशिष्टे शक्तिरूपेयमेव इति गुरुहृदयविदः एकदेशिनस्तु गोत्वादिविशिष्टगवादिविषयकशाब्दत्वं गोत्वादिशक्तिज्ञानकार्य्य
तावच्छेदकं तत्तो व्यक्तिभानानिर्वाहेनैव गवादिपदात् घटत्वादिना घटादेर्गोत्वादिनागवादेर्वाभानं एवं सति व्यक्तेरपि शाब्द
धीविषयतया शक्यत्वमनिवार्य्यमितिनतच्छंकामभिहितोत्तरत्वादित्याहुः अन्येतु गोत्वादिविषयकशाब्दत्वमेवकार्य्यताव
च्छेदकं गोत्वादिरूपमनवच्छिन्नविषयतया कार्य्यतावच्छेदकसंसर्गितया नातिप्रसंगः इत्थं च शुद्धमेव शाब्दत्वं कार्यतावच्छेदको
धर्म्मो न तु गोत्वादिविषयकत्वमपि तत्र निविष्टं प्रयोजनाभावात् गोत्वादिरूपमनवच्छिन्नप्रकारतानिरूपितविशेष्यतासंसर्गे
णाभावत्त्वावच्छिन्नं प्रति च समवायेन गोत्वादिकं हेतुः तेन व्यक्तिभानं गोत्वादिनातद्घटत्वादिना गोत्वादिनागवादेरभा
नं च निर्वहति निरुक्तकारणद्वयस्य दित्तसामर्थ्यात् कार्य्ये न तु पतिप्रयोजकत्वोपगमात् न शक्तित्वानमंतरेण गोत्वादिकं गवादि
भानं भजते इति न च निरुक्तकार्यकारणभावद्वयकल्पनमपेक्ष्य लाघवाद्गोशाब्दत्वावच्छिन्नं प्रति गोत्वशक्तिज्ञानत्वेनैकमेव
कारणत्वं कल्प्यमितिवाच्यं गोत्वादिप्रकारतानिरूपितगवादिरूपविशेष्यतात्वेन गवादिविशेष्यतानिरूपित
गोत्वादिप्रकारतात्वेनापि कार्यतावच्छेदकघटकतायाः स्ववचनयाविनिगमनाविरहेण कार्यकारणभावद्वयस्यापरिहा

म॰ द्वा॰
प्रका॰
टी॰
५
पू॰ ना

तात्मकनिर्विकल्पकस्यापि संभवान्नियमतस्तयोर्वैशिष्ट्यावगाहिनः शाब्दबोधस्यानुभवसिद्धस्योपपत्तये व्यक्तिशक्ति
वादिभिरपि स्वीकरणीयेति वदंति जातिविशिष्टव्यक्तिशक्तिवादे तज्जातिप्रकारकज्ञानत्वावच्छेदकमिति यत्तेन तद्रूप
णां सामस्तीति विभावनीयं यत्तु यथा करणाधिकारात्वेकत्र मत्वा कारकत्वासौ संकीर्णतायां त्वादावारुणादौ तदाश्रये च क्रमसो
पनतानां चवौ घटत्वधाराभानतयेत्यादावपि शोतत्तदाश्रययोः कर्मत्वबोधः तत्र जातौ साक्षादानयनकर्मताविरहे पि स्व
र्माधिकरणात्मकपरंपरासंसर्गेण तदन्वयबोधः शाब्दो जातेः शक्यत्वात् तदुत्तरमानयनकर्मत्वस्य गोत्वसामा
२ नाधिकरण्यं गोत्वं विनानुपपन्नमित्यनुपपत्तिज्ञानसहकृतेन गामित्यादिवाक्यानुसंधानेनौपादानिकः क
र्मत्वादौ गोत्वमित्यादिरीत्या व्यक्तेरशाक्यत्वे तद्विनानुपपत्तिप्रतिसंधानं वाच्येन बोधयितुमशक्यत्वादौपादानिकेबो
धेपदवृत्तिज्ञानानपेक्षणाच्च हेतुपदजन्यत्वानुपपत्तिरिति निर्विलापितज्ञानं स्वरूपपादमिति श्रीकरमतं तदयुक्तं अ
नुपपत्तिप्रतिसंधानमंतरेणापि गामानयेत्यादितो गोत्वाद्यन्वितानयनादिकर्मतयानुभावस्यानुभविकत्वात् सुवृत्तो
त्वकर्मताकत्वादितानयनादिबोधस्यांतरोत्पत्तेरनुभवात् तादृशत्वाच्च गोत्वत्वादेरनुपस्थितत्वाद्गोत्ववृत्तिकर्मत्व
मित्यादेस्तत्प्रकारकबोधस्यासंभवाच्च किंच गोत्वार्थापत्तिरनयोर्विरुद्धत्वात्तदभयावच्छिन्नस्यैकस्य बोधस्या
लीकतयानुपपत्तिप्रतिसंधानसहकृतेनापि शाब्दे तौ पादानिकबोधस्योत्पादयितुमशक्यत्वात् भट्टानां तु वि
शेष्यतानभिधानाच्छेदनीयाशक्तिविशेषणे अन्वयबोधनकपदार्थस्मरणप्रयोजकः पदपदार्थसंसर्गः सर्वत्रा
दिप्रसिद्धः स च संकेतो वाभिधाभिधेयपदार्थांतरं वेत्यस्य देतत्स च संबंधोनगवादिव्यक्तौ व्यक्तीनामानंत्येनता
भिः संबंधग्रहासंभवात् नच गोत्वादि सामान्यलक्षणयासकलगवादिव्यक्त्युपस्थित्या तत्र संबंधावगमः स्वरूपपा
दत्तिवाच्यं सामान्यलक्षणाभावात् भ्रमासक्तिस्तेमानाभावान्नभावेवाः न्यलभनतया व्यक्तेरशक्यत्वस्यावश्यकता

तिपरामर्शादीनां विशेषकार्यप्रकारणभावांगीकाराद् यथा सत्त्वमितिसामान्यं प्रतिज्ञानत्वादिनाकारणत्वमंगीकर्त्तुमुचि
तं स्याल्लाघवात् तथाचान्वयबोधप्रयोजकविषयतायाः कारणप्रयोजकतार्थमेव व्यक्तिशक्तिसुपेतानुपूर्वस्यत्वप्रयोजक
त्वमुपेयमिति तदपितन्नाथीयः प्रयोजकत्वांकयान्यतान्विषयतानां सामान्यस्य कारणप्रयोज्यतासिद्धेः प्रयोज्यत्वमा
त्रस्य सिद्धावपि जातिभासकसामग्र्या व्यक्तिभानप्रयोजकत्वोपगमेन प्रकृतानुत्तेः किंच कारणप्रयोज्यतानियमनेपि जा
तिमात्र्यक्ति ज्ञानस्य कार्यतावच्छेदकं व्यक्तिविषयताघटितमित्यादिपक्षे तदनपायेनादोषात् केचित्तु गोत्वप्रकारकज्ञानं का
रणत्वमेतेन न किं गोत्वशक्तत्वं न तावत्तत्सामर्थ्यमसिद्धेः नापि गोत्वविषयकमभिधाभिधेयपदार्थान्तरं तत्र प्रमाणाभावात्
नापि गोत्वान्वयबोधजनकत्वं समूहालंबनबोधजनकपदान्तरे विशिष्टान्वयबोधजनकगवादिपदसमकालीनघटादि
पदे चातिप्रसंगात् गोत्वान्वयबोधसामान्यजनकतोक्तौ ज्ञात्वादिपदाधीनानुभवे व्यभिचारेण तदनुभवसामान्यस्य ग
वादिपदानधीनतया गवादिपदेऽव्याप्तितदसत्त्वात् न च गोत्वान्वयबोधजनकत्वप्रकारतानिरूपितं तेन छुप्तमत्र स्ववा या०६७
विषयत्वं गोत्वशक्तत्वं गोपदं गोत्वेन गोबोधजनकतयानसंकेतितमिति वाच्यं निर्णयेपि तद्बोधाङ्गोत्वेन गोबोधापत्तेर
तो गोत्वेन गोबोधस्य जनकत्वप्रकारतानिरूपितं तादृशविषयत्वमेव तद्व्यक्त्यमेव च तादृशशक्तताज्ञानत्वेन कार
णतायां गोविषयत्वस्याप्यवच्छेदकत्वाद्व्यक्तिशक्तिरावश्यकीति वदन्ति अवच्छिन्नानुमितव्यक्तिज्ञानोपपत्तये प्रथमं
तो व्यक्तिशक्तौ निर्णीतमानायां जातावनुपस्थितायां न तत्र तदा शक्तिधीः पश्चात्तु व्यक्त्याहृतयेऽनुगमाय च जातौ शक्ति
तानविषयतां मानान्तरेणानिर्णीयतद्बोधेपि पदस्य कारणतामवधारयतीति व्यक्तिबोधकारणतामुपजीव्य जातिबो
धकारणताबोधाङ्गुपजीव्यविरोधभयेन सम्बन्धापेक्षायां वादो व्यक्तिशक्तिरपक्षेऽनुभवसाक्षिकत्वमप्याहुः मिश्रास्तु तत्सविति
वेयतया व्यक्तिभानसंभवेपि जातिव्यक्तयोर्वैशिष्ट्यभानं तन्न संभवतीति जातिमात्रस्य वाच्यत्वे जातिव्यक्तयोः सम्बन्धलंब

प्रा

दनएवजातित्वं गोत्वत्वं वा न दर्शितमाश्रयस्यैकमनुपस्थितेरनवच्छिन्नस्यैव गोत्वस्य गोपदशक्यत्वादि

म.सू. त्यपिप्रत्युक्तं तदीयज्ञानानपेक्षणात् लघुरूपगोत्वादेरेवानुपपत्तिप्रतिसंधानेनाप्युपस्थितत्वसंभवात्

प्रा. स्मृतएवचगोत्वत्वादिसापेक्षज्ञानेनदृष्टकल्पनाधाव्यक्तिज्ञानमपेक्षितमेवेष्टादेयोः नर्थकत्वमपिसमादिदं

७८ स्वरूपतएवगोत्वस्यादेयकत्वोपपत्त्यागोत्वस्यादेयकत्वोपपत्त्यागोत्वत्वज्ञानानपेक्षणात्। नचगवादिपद

जातिव्यक्तिप्रतीत्योः क्रमिकत्वानुभवाज्जातिप्रतीत्याव्यक्त्याक्षेपोऽनुपपन्नइतिवाच्यं दर्शितयुक्तिभिर्यु

क्तिसाम्यसिद्धेर्जातिव्यक्तिप्रतीत्योर्यौगपद्यप्रतीतेर्भ्रान्तित्वकल्पनेऽपितुल्यत्वेनतयोः क्रमिकत्वा

54 स्फुटेः अथगोत्वादिविशिष्टस्यादेयत्वलक्षणसंभवेऽपितत्तत्कर्मताकल्पनादिनानयत्वादिबोधोऽनुपपन्नः

पदश्रुतिज्ञानप्रयोज्योपस्थितिकस्यैवान्वयबोधेभानोपगमात् यदिचपदंविनापिसमुपस्थितः स्वतमा

यमित्यादौविभक्तिनाथनेतहारमित्यादौचान्वयबोधदर्शनान्नपदश्रुतेरप्रभावेनियामकत्वमितियं

मोः लिङ्गिमत्वसेनदापिप्रत्यक्षानामकृत्यर्थानिलसार्थबोधकत्वनियमस्तुतत्पदेनेदिनीयान्यर्थ

कर्मत्वादौगवादेरन्वयोनोपपद्यतेप्रकृत्यर्थगोत्वादेरन्वयः प्रकृतमतेएवंगवादेरेकैवनीयार्थसंख्यान्वयोः

प्यनुपपत्तेः प्रकृत्यर्थत्वात्। नचदर्शितनियमेप्रकृत्यर्थत्वंतत्प्रकृतिजन्यप्रत्ययत्वंकिंतुप्रकृतिप्रयोज्य

बोधविषयत्वेनतात्पर्यविषयत्वंतच्चाम्लेच्छयितयातात्तोपदर्शितान्वयानुपपत्तिरितिवाच्यंतथा

हिप्रकृत्यर्थत्वप्रवेशेगौरवात्। नचाप्रकृत्यर्थेपिप्रत्ययमानार्थेलिङ्गसंख्यान्वयदर्शनेनव्यभिचारा

त्तोपदर्शितनियमः संभवतीतिवाच्यंकर्तृत्वादेर्लिङ्गसंख्याप्रकृत्यर्थान्वयितयाव्यभिचाराभावकात्

श्रितजातित्वादित्यनुमानेन तदा

नन्वेवं हि गोत्वादिजातेरेव शक्यतया गवादिपदशक्तत्वादिबोधानन्तरं गोत्वं द्रव्यशक्तिसिद्धिः शक्तिं विना जातेरप्रियतेर्व
ज्ञाताश्रितत्वसंपर्कभावप्रतियोगिताज्ञानित्वेनार्थोपस्थितिर्वा न च व्यक्तत्वाश्रितत्वसाधनमकिंचित्करं गौरित्याकारि
कायाः प्रतीतेरनुभवप्रमाणतायाः प्रसिद्धत्वादिति वाच्यं गोत्वत्वेन हेतुना तादृशाश्रितत्वस्य गवात्ताश्रितत्वव्यापकाभा
वप्रतियोगितागोत्वत्वेन तादृशप्रतीयत्वात् वस्तुतस्तु गां विना गोत्वमनुपपन्नमित्यर्थापत्त्या गोत्वविशिष्टसिद्धि
रत्र चानुपपत्तिज्ञानमात्रं कारणं न तु व्याप्तिज्ञानादिकमपि वह्निः सत्वव्यभिचारिणोऽपि गृहे जीवितो भावस्य
सिद्धिः सत्वं विनानुपपत्तिज्ञानमात्रेणानन्त्र वह्निः सत्वस्य सिद्धेः एतेन गवाश्रितत्वे गवेतरासमवेतत्वे सति सकल
गोसमवेतत्वात्मके न गोत्वत्वेन न साधयितुं शक्यमनन्तस्य व्यभिचारावारकत्वेन व्यर्थत्वयाः साधकत्वात् न च
व्यर्थविशेषणाघटितः स्वाभिव्याप्यव्याहृत्यासाधकत्वमव्यात् इत्येव वास्तु बाधिकेऽन निग्रहस्थानता
भीस्यास्वस्थनविनिर्मुक्तस्यैव हेतुतेति वाच्यं तावता पिसिद्धसाधनस्यापरिहार्यत्वात् सकलगवाश्रितत्वात्मक
हेतुनिश्चयस्य गवाश्रितत्वसिद्धित्वात्तया तेन तदनुमितिप्रतिकूलत्वावश्यंभावात् किंच गामानयेत्यादिवा
क्यतो गोत्वादिविशिष्टस्य क्रियान्वयबोधे गौरित्याकारिका गोत्वप्रकारिका गोविशेष्यिका धीः कारणतयापेक्षि
ता तादृशी च धीर्व्यक्तिशक्तिं विना न निर्वहतीति प्रमाणान्तरस्यासंभवेऽपि तत्वादिष्वपि समाहितमनुपपत्तिप्रति
संधानेन गोत्वविशिष्टस्य सिद्धेः न च व्यक्तिवाच्यत्वानुपपत्त्यैव मतो गवादित्वानासत्वे गां विना गोत्वमनुपपन्नमि
त्यनुपपत्तिज्ञानमप्यसंभवीति वाच्यं गोत्वाद्यात्मकसंबन्धितानस्य हेतोर्बोधकतया गवादिव्यक्तिस्फूर्तिसंभवादन्य
थावद्धिः सत्त्वादेर्जीवी देवदत्तो गृहे नास्तीत्यादिप्रत्यादनुपस्थितस्य तदनुपपत्तिप्रतिसंधानमप्यनुपपन्नं स्या

म० प्र०
पृ०
७१

53

दिभानं तेनोपपद्येत घटत्वत्वादेरनुपस्थितेः ॥ एतेन वस्तुतो गोत्वशक्तत्वेन पदज्ञानस्य कारणत्वे गोपदं गो
शक्तमित्यादिज्ञानादप्यनवच्छिन्नगोत्वादिभानापत्तिः गोत्वत्वाद्यवच्छिन्नशक्तताज्ञानत्वेन कारणताक
ल्पने गोत्वत्वाद्य...प्रवेशलाघवेन गोत्वादिविशिष्टशक्तताज्ञानत्वेन न यावत्सिद्धा शक्तिशक्ति
सिद्धिप्रसक्तिरित्यपि प्रत्युक्तं गोपदविशेष्यकगोत्वशक्तताप्रकारकज्ञानत्वस्य कारणतावच्छेदकत
यानन्यानवच्छिन्नस्यैव गोत्वस्य सम्बन्धविशेषविषयितासंसर्गेण विशेषणतायां गोत्वत्वादिप्रवेशगौरवपूर्व
कत्वेन गोत्वानवकाशात् एतत्समवायेन तत्संसर्गावच्छिन्नानवच्छिन्नजातिप्रकारकोपगमे कालो
गोः पदं गौरित्यादिप्रतीतेः प्रामाण्यापत्तिः कालिकशक्ततादिसंसर्गेण गोत्वादिमति कालपदादौ
तथाविधसंसर्गेण गोत्वादिप्रकारकत्वादिति तन्न कालिकशक्ततादिसंबंधेन गोत्वादिमतिता
दृशसंसर्गेण गोत्वत्वाद्यवच्छिन्नप्रकारताकत्वस्यैव तादृशसंसर्गघटितगोत्वादिप्रामाण्यघटकत्वो
पगमादनवच्छिन्नतादृशसंसर्गावच्छिन्नगोत्वादिप्रकारताघटितप्रामाण्यप्रसिद्धेः प्रकारभे
दस्येव प्रकारतावच्छेदकसंसर्गभेदस्यापि स्वघटितप्रामाण्यभेदकतायाः प्रवश्यंभावात् अत एव
घटत्वादिज्ञाने संयोगेन समवेतत्वमतेऽस्यां गोघटइत्यादिप्रतीतेः प्रमात्वापत्तिः समवायेन घट
त्वादिमत्यपि समाहितं तन्मते समवायघटितघटत्वादिप्रामाण्यस्य घटत्वत्वाद्यवच्छिन्नप्रकारताघ
टितत्वात् अन्यथा व्याप्यधीनस्यैव प्रमात्वाद्याभावकस्यापि कालो गोः पदं गौरित्याद्याकारकबोध

दिमतितेन संबंधेन घटत्वादिप्रकारताकत्वा...

ग्रात्मभावार्थकप्रत्ययानामपि स्वरूपार्थकतायाः सिद्धांतितत्वेन तत्राप्यधिकारस्यानवतारात् विशिष्य
सोवातिङ्. त्वत्वेन प्रत्ययः प्रत्ययत्वं पर्यन्तस्य स्रमेन वा निवेशनीयं न च घटत्वं तदौर्लभ्येन जातिशक्ति
वादिनस्तथाविधनियमस्याहीयत्वमशक्यत्वात् इति वाच्यं घटादिपदानां व्यक्तिवाचकत्वस्योभयसिद्धत्व
याद्घटत्वसौलभ्यात् इति चेन्मैवं अप्रयोजकत्वशंकाकलंकितत्वेन तादृशनियमस्यानास्थेयत्वात् दृश्व
वात्तथानियमस्तथापि स्वार्थकर्मत्वादेः सामानाधिकरण्यसंसर्गेण गोत्वादेरन्वयबोधे सत्त्वनष्टेर्वा का
ताज्ञातकार्यकारणभावाभ्युपगमात् गवादिकर्मताकत्वेनानयनादिबोधस्यासेधात् कर्मत्वं गोत्व
त्तियोगसमानाधिकरणकर्मतात्वादिनयते गोवृत्तिकर्मताकं गोत्वसमानाधिकरणकर्मताकत्वादि
साध्यमानस्य कर्मत्वस्य गोत्वसामानाधिकरण्यं गोवृत्तित्वं विनानुपपन्नमानयनस्य गोत्वसमानाधि
करणकर्मताकत्वं गोवृत्तिकर्मताकत्वं विनानुपपन्नमित्यर्थानुपपत्तिप्रतिसंधानाधीनार्थापत्तेश्च
संभवात् न चानवच्छिन्नगोत्वादिजातिघटितांशकारकत्वमादरत्वपरिस्थितासामानाधिकरण्यसंस
र्गेण कर्मतादेर्गोत्वाद्यन्वयबोधस्तदधीनार्थापत्त्युपपादः समवायेन रत्नसंसर्गावच्छिन्नजातिप्र
कारतायाश्चावच्छिन्नत्वनियमादिति वाच्यं तादृशनियमे मानाभावात् सामानाधिकरण्यसंसर्गाव
च्छिन्नतायाश्चापि जातिप्रकारतायामनवच्छिन्नत्वसंभवात् अन्यथायं घट इत्यादिप्रत्ययस्य समयदेशे
नज्ञातामीत्याकारके ज्ञाततालिंगकानुमाने ऽनुव्यवसाये वा प्रकारतायामपेयतां संसर्गांशघटत्वा

महा॰
प्रभा
पृ॰
७८

54

त्वविशेष्यकस्यापि संभवात् न च तादृशसंस्कारे गोत्वनिमित्तोद्बुद्धत्वादेर्गौरवाद्दोषाभिचारितान्न तादृशानुमानसंभव इति
वाच्यं विशिष्टस्याभिचरितत्वात् किंच गोत्वे गोत्वसामानाधिकरण्यं गोत्वे इति तं विनानुपपन्नमित्याकारकेऽपि वानुप
पत्तिप्रतिसंधानेन गोर्गोत्वं नीलाकारिकाधोत्वविशिष्टज्ञानसंभवस्यार्थापत्तिः फलबलेन भिन्नविशेष्यकानुपपत्ति
प्रतिसंधानस्यापि तत्कारणताभ्युपगमात् स्याज्जीवी देवदत्तो गृहे नास्तीत्यादिवाक्यजबोधोत्तरं बहिःसत्त्वं
विनाजीवित्वमनुपपन्नमित्याकारकानुपपत्तिप्रतिसंधानेन बहिर्वर्त्ति देवदत्त इत्याकारकदेवदत्तत्वविशेष्यकज्ञानोत्पत्ते
रनुभवसिद्धत्वात्प्रत्यक्षानुपपत्तिः स्यादिति मैवं नानुपपत्तिनस्तु ज्ञानेन शक्त्यंशे शक्तिबोधोत्तरलक्षणयेति नाप्येवमवश्यंभावः
एवं वक्तव्यत्वे तज्जन्यायाः पदार्थोपस्थितेः शाब्दबोधकारणत्वेऽपि न काचित्क्षतिः गौर्जायते नश्यतीत्यादौ जातेरुत्प
त्तिविनाशाद्यसंभवेऽपि च न शाब्दबोधानुपपत्तिः न च लक्षणापि तथा लाघवेन व्यक्तिशक्तिकल्पनमेवोचितमिति वा
च्यं व्यक्तीनामानन्त्यात्तत्र शक्तिग्रहस्याशक्यत्वात् अनन्यलभ्यत्वाभावान्न शक्तेः कल्पयितुमुचितत्वाच्च न च गौरस्ति गाव
ग्रेन्यादावृत्तित्वदर्शनविषयतादेर्जात्यादावबाधेनान्वयानुपपत्तिविरहाल्लक्षणाया असंभवेन व्यक्तिशक्तिरावश्यकीति
तो व्यक्तिबोधस्यांशे स्मृतानुभविकत्वादिति वाच्यं तात्पर्यविषयीभूतार्थबोधानुपपत्तेर्लक्षणाबीजत्वादुक्तस्थले व्य
क्तिबोधस्य तात्पर्यविषयत्वेन जातिशक्त्या तदनुपपत्तेर्लक्षणाया आवश्यकसंभवात् तदुक्तं भट्टपादैः जातेर
स्तित्वनास्तित्वे न हि कश्चिद्विवक्षति नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे इति अथ जातावेव शक्तिरिति चेत्
पपद्यते शुक्लश्चलडित्थ इत्यादिशब्दानां गुणक्रियासंज्ञासु शक्तेरावश्यकत्वात् अत एव जातिगुणक्रियासंज्ञाशब्दानां।
भेदानुपपत्तेरुपाधौ शक्तिः उपाधिश्च द्वेधा कश्चित्स्वभावतो व्यक्तिः इति गोत्वादिस्वरूपः कश्चिदभिधायायदृच्छया

स्यानियमतः समवाये गोत्वादिविशिष्टभेदावगाहितया भ्रमत्वमिति न काचिदनुपपत्तिः । एतज्जातिज्ञानसामग्रीष
क्तिज्ञानसामग्रीनियतत्वे तज्जातिशक्तैवशाद्बोधे व्यक्तिभानं निर्वाहादावेतत्तु स्वरूपमप्रयोजनकमिति । तदुक्तं लौ
किकप्रत्यक्षसामग्र्या जातिभानप्रयोजिकाया ज्ञातविषयसन्निकर्षव्यक्तिविषयसन्निकर्षावश्यंभावे न तद्व्यक्तिव्य
क्तिभासकसामग्रीनियतत्वस्यार्थसमाजाधीनस्य सत्त्वेऽपि स्मृत्यादौ बाधादिप्रयोजकसामग्र्या जातिभासिकायाः
स्वस्वविषयकशाब्दसंस्कारादिरेवेति तद्व्यक्तिस्मृतिशाब्दादिप्रयोजकसामग्रीनियमस्यावश्यकत्वात् । न च जाति
ग्राहिज्ञानस्य कार्य्यतावच्छेदकं व्यक्तिविषयताविशिष्टत्वमिति शाब्दसामग्र्या विजातिभानप्रयोजिकाया व्यक्तिशाब्दप्रयोजक
सामग्रीनियतत्वादेरेव निर्वाच्यत्वे व्यक्तिभानमात्रस्यैवमनुपपत्तिः सम्भवतावपि स्यात्प्रसङ्गस्य वैयर्थ्यात् सर्वत्रैवाकाङ्क्षा
त्वाद्यन्वयानुपपत्तेः पारिशेष्यात्तादिति वदन्ति । नव्यास्तु साध्यं सामान्येत्यादिवाक्ये गवादिकर्मकानयनादिबोध
स्यान्तरेणाभिधानादित्यतिसन्धानमनुपपत्तिप्रतिसन्धानं चात्र मत्वा सिद्धान्तानुपपत्तेः । किंच गौर्गच्छतीत्यादितः न व ।
विना गोत्वादौ सामानाधिकरण्यसंसर्गेण तन्निष्ठत्वाद्यवबोधो वाच्यः सर्वाः प्रवृत्तेः स्वतोऽननुभविकत्वात् नच गोत्ववा
घवति विशेष्यताको गत्यादिप्रकारकबोधोत्पत्तिर्गच्छतीत्याकारकबोधस्तत्र भवतीति व केशवाद्यो गोत्वताघटत्वादि न्त्व
स्यानन्वयप्रसङ्गात् । यत्तु गौर्गच्छतीत्यादितो गत्यादेः सामानाधिकरण्यसंसर्गेण गोत्वादौ बोधोऽन्तरङ्गान्तिरीगा
तिर्गोत्वसामानाधिकरण्यत्वात् । गतेर्गोत्वसामानाधिकरण्यगोचरत्वविनानुपपद्यमानत्वाद्याकारकत्वमनुपप ।
त्तिप्रतिसन्धाने न गतिर्गोत्वमिति विशेष्याकारकज्ञानस्यानुपपत्तावपि गौर्गच्छतीत्याद्याकारकस्य गोत्वविशेष्यकबोधस्या
नुपपत्तिरेव निरूपणं तत्तु गौर्गतिमानसामानाधिकरण्यसंसर्गेण गत्यन्वयः तन्मतदाह्य यत्त्वादित्याद्यनुमानस्यागवादिषु

मुक्ता
प्रभा
प्रा ७९

55

ट्वा घटीति तदित्यादिशाब्दानां भेदसिद्धान्तज्ञानुगतप्रतीतिसिद्धा सा इत्यर्थशाब्दत्वादिज्ञानित्वशक्तिः वस्तुतस्तु वाक्यघो
वनादिभेदेनानापत्तिसामान्यात्मकविरुद्धधर्मासमावेशाघ्रियमाणेष्विरित्यादिशरीरेष्वनुगतप्रतीतिसिद्धा इत्यत्राय्ये
जातिविशेषरूपत्वादित्यादिपदशाकाः पदेन शाब्दानामित्यर्थः शाब्दत्वादयो न जातयो इत्यादिशाब्दघटकप्रत्येकवर्णे
इत्यर्थशाब्दत्वादिव्यवहारस्य नानावाक्यग्रहेण शाब्दपि षक्प्रसंगात् नचइत्यादिशाब्दघटकवर्णसमुदायपर्याप्तमाप
वत्वाद्दशाज्ञानत्वइतिनोक्तदोषाविनिवार्य व्यासंस्पष्टजातावनेनांगीकारेणतस्यावक्रमणशक्यत्वादित्यपि प्रत्युक्तं चेत
धोविभागस्तु वक्तुं विषयः स्याश्रितवोधकतयाप्युपपद्यते सचानतिप्रयोजकतयानादरणीयः तस्मात्सर्वे घांशाद्या न
नोजातिरेवशक्तेतिमन्यते नेदंतमतमात्रं वनिराचष्टे नवद्यक्तादिनाम्यादिना लक्षणेति शक्यायाजातेः सा
क्षानसंबंधस्यव्यक्तावभावात्तत्वादिस्वभावः अनुपपत्तीत्यादि तात्पर्यविषयीभूतार्थबोधस्यशाब्दप्रमादायानु
पपत्तेर्जातेनोपित्तनेत्यर्थः अपिशब्दः समस्तदेवशरीरेष्वनयोजनीयो दोषान्तरसमुच्चयाय तथाहि जातेःशक्यत्वे
नहिशिष्टलक्षणेनसंभवति स्वार्थाद्धन्नरूपेणज्ञातेन अनितलक्षणेति सिद्धान्तात् नवाशक्यव्यक्तित्वाय वच्छिन्ने
लक्षणेपयेतिशक्यतेवक्तुं तथासति व्यक्तित्वादिना तद्बोधप्रसंगात् किंच केवलजातौमुख्यप्रयोगाभावे
तज्जातिशक्तेरप्रामाणिकत्वं तन्मूलकव्यक्तिलक्षणासंभवनापि नचेह गोत्वेनीलिपत्वयोर्गोरित्यादा
ववच्छिन्नप्रतियोगितकत्वसंसर्गेणान्वयबोधावेगोरन्योगादवयङ्गत्वादावच्छेदकतासंसर्गेणापचन्मथेप्रतियोगि
त्वादौचगोत्वादिजातेरन्वयदर्शनाद्व्यक्तिजातौ मुख्यप्रयोगः नवच्छिन्नजातिप्रकारतायाः समवायावच्छिन्नत्व
नियमेमानाभावस्यप्रतिपादितत्वाद्वाच्यत्वाभ्युपगन्तव्यं गौरचलितामनयेत्यांप्रक्षेत्यादिव्यवहारेण व्यक्तिशः

नन्वत्र बोध्यत्वेन स्मृत्यादितः संज्ञारूपः स्वभावतोऽव्यक्तिवृत्तिरपि द्विधा सिद्धः साध्यस्य तत्राप्याद्यो द्विविधः यावद्
व्यक्तिस्थितिस्थायी व्यक्तिविशेषकस्य आद्यो जातिर्हि तौ यो गुणः गोत्वादिना हि प्रतीयमाना व्यक्तिः शुक्लादिना गु
णेन विशिष्यते न च गुणगतशुक्लत्वादिजातीनामपि यावद्व्यक्तिस्थितिस्थायित्वात् तत्रास्तु संकेतः किं हि विषयवि
भागेनेति वाच्यं घटादौ पाकादिना शुक्लादेरपायेन शुक्लत्वादिसंबंधापायो गोत्वादेस्तु न कदापि व्यक्तिस्थितौ न
संबंधापाय इति विशेषात् साध्यः पूर्वापरीभूतावयवः क्रियारूपः पूर्वं निरुक्तो गत्वादिस्वरूपः चतुर्थः यादृच्छ
क इति गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः परमाण्वादिषु गुणशब्दत्वप्रवादो वैशेषिकनयानु
सारी पारिभाषिकः परमार्थतस्तु परमाणुत्वादीनां यावद्व्यक्तिस्थितिस्थायित्वाद्विशेषजातिशब्दत्वमेव तेषां न
च शुक्लादिशब्दानां गुणशब्दत्वमसम्भवि आश्रयभेदभिन्नेषु तेषु शुक्लादिषु शक्तिकल्पनस्य व्यक्तिभेदानन्त्य
गौरवग्रस्तत्वेनासम्भवादिति वाच्यं शुक्लादीनामाश्रयभेदेऽप्यभेदात् भेदप्रतीतिस्तु पार्थिवजलतेजोद्रव्या
दिषु प्रतिविशिष्टस्यैकस्यैव गुणस्योपाध्यभेदोपलब्धिवदित्यादिकमभिमतं शाब्दिकैरिति तत्र मैव पाकान्नीलो नष्टः
शुक्ल उत्पन्नः शुक्लो नष्टो रक्त उत्पन्न इत्यादिप्रतीत्या शुक्लादीनामाश्रयभेदाद्भेदसिद्धौ शुक्ल इत्याद्यनुगतप्रत्य
यबलेन तद्वृत्तिशुक्लत्वादिजातिषु शुक्लादिपदशक्तेः कल्पनात् न च शुक्लादेः रूपादिविनाशप्रतीतिर्भ्रान्ति
रिति वाच्यं तत्र बाधकाभावात् नापि तत्संबंधो विषयस्तत्र लोके शुक्लत्वाद्याश्रयगुणानां तदाश्रयगुणे च
वाच्यत्वादिपदानामभिलप्यत्वात् एवं क्रियाशब्दानामपि गतित्वपाकत्वादिषु शक्तिर्न तु विभुप्रतीतिसिद्धभेदव
दाश्रयक्रियासु गत्यादीनामिति डित्थादौ शक्तिः डित्थादिनाम्ना मपितारत्वमेतादिविहितधर्मो भासमानस्तु

महा
प्रभा
पू. ८०

56

क्तिज्ञानत्वेन गोपदविशेष्यकतत्तद्व्यक्तिशक्तताप्रकारकज्ञानत्वेन वा कारणत्वे व्यभिचारः अननुगतानन्तप्रसक्त
धर्माभावेन सर्वव्यक्तिसाधारणैककार्यकारणभावस्य निर्वक्तुमशक्यत्वात् न तद्व्यक्तिविषयकशक्तिज्ञानत्वे
न तत्तद्व्यक्तिविषयकशाब्दबोधं प्रति हेतुककारणतामुपगम्य व्यभिचारवारणं संभवेपि कार्यकारणभावानन्त्यं
दुर्वारमिति भावः गोत्वादेरिति आदिना घटत्वादिपरिग्रहः गोत्वादिजातेः सकलव्यक्तिसाधारण्यात् गोत्वादि
विशिष्टविषयकशाब्दत्वावच्छिन्नं प्रति गोत्वादिविशिष्टविषयकशक्तिज्ञानत्वेन कारणतायां न व्यभिचारो ना
नन्त्यमिति भावः एवकारोप्यर्थे आकृतेरपि पदार्थता यावत्स्मरणेन यानि तदनुगमकत्वेनास्य समुच्चायकेति
बोध्यं यद्वावधारणपरमेवैवकारोऽनुगमकत्वादेव नियोजनात्तेन च गोत्वादेः सकलव्यक्तिसाधारण्यस्य सर्वैः
स्वतयानानन्त्यगमः शङ्कास्पदोऽपीति प्रतिभासते आकृत्यननुगतवेजात्यस्य तत्तद्घटत्वादेरिवादिपदेन परिग्रह इति
ननु जातौ व्यक्तौ वास्तु शक्तिः किन्तु व्यक्तिविषयकत्वेन कारणतावच्छेदकं जातिशक्तज्ञानत्वमेव जातिविशि
ष्टाया व्यक्तेः स्मरणं शाब्दबोधं च प्रति कारणतावच्छेदकमिति व्यक्तांशे जात्याः शक्तेरुपगमे न दर्शितदोषावसरः
पदवृत्तिमत्वात्मकपदार्थतायां व्यक्ताविपि सत्वे न कृत्यापदजन्यायाः पदार्थोपस्थितेरेवैकल्यात् नहि तत्तद
र्थवृत्या तत्तदर्थोपस्थितित्वेन तत्तदन्वयेन जातिवृत्तिता च जन्यत्वाच्च्युपस्थितिं नं कारणं स्यादित्याशङ्कां व्यक्ता
क्तिसाधारणेन दूषणमाह किंच गौरित्यादिना इति शक्तिग्रह इति इत्याकारकशक्तिग्रह एव यदि कारणं न तु गो ह
त्वशक्यमित्याकारक इत्यर्थः व्यक्तौ शक्तिरिति व्यक्तिविषयतानिरूपितशक्तिविषयत्वमव्यर्थं कारणतावच्छेद
कघटकमित्यर्थः तद्विषयतायाः कारणतावच्छेदकत्वमन्तरेण तद्विषयकप्रमाद्यपेक्षानियमस्यासंभवादिति भावः

क्ति सिद्धौ स्वनिष्ठगोत्वावच्छेदकमनियोगिताकत्वादिना स्वनिष्ठगोत्वावच्छेदकत्वादिना च संसर्गेण गतमनन्तं तत्र एवं
मर्यादया न्यायमतसिद्धत्वात् यत्तु शक्तिलक्षणाभ्यां ज्ञातिव्यक्तिबोधोपगमे युगपद्वृत्तिद्वयविरोध इति
३ व दूषणोद्भावनं तत्र न्याये तावत्संस्पेत्युगपद्वृत्तिद्वयेनार्थद्वयबोधकत्वेन दोष इति सिद्धान्तात् व्यक्तिमात्रे मीमांसक
के दूषणमाशंकोद्धरति न च व्यक्तिशक्ताविति आनन्त्यमिति हेतुः अशक्यत्वात् न सा बोधकत्वमशक्यत्वात् न कसमु
दायत्ववत्त्वरूपेण तदर्थः तादृशशक्तिसमुदायपर्याप्तसमुदायत्वस्यासर्वज्ञेन ज्ञातुमशक्यत्वात् समवायसम्बन्धेन (?) तु पर्यव
सितोऽर्थः वस्तुतः व्यक्तिकल्पने गौरवं तु दोषः पदार्थानन्त्यरूपायाः शक्तेरप्रामाण्येन भेदादित्यभिमानः एकस्या
इति तत्तत्पदजन्यबोधविषयत्वप्रकारतानिरूपितभगवदिच्छाविशेष्यतायाः एकस्या एव सत्त्वेन गवादिव्यक्तिसा
धारण्यादिति भावः ईश्वरेच्छारूपायाः शक्तेरनेकत्वादित्यत्र युक्तं तस्याः शक्तित्वाप्रमाणत्वस्य तद्विषयताविशेषस्य
तदात्मकत्वस्य ग्रन्थान्तरेऽस्य च प्रागेवोपपादितत्वात् दूषितत्वमुपरिष्टाद्विकृतिष्यते एवं कारेण पदार्थान्तर
व्यक्तिरिति मीमांसकपक्षेऽपि व्यक्तिभेदेन तद्भेदस्य निर्युक्तिकत्वात् पूर्वपक्षानवतारमाविष्करोति तथाहि व्य
क्तिभेदेन तद्बोधे भेदाङ्गीकारे गौरवान्नश्वेवं व्यक्तिमात्रधारणे केवलाङ्गीकर्तुमुचिता न च तत्र नयानुत्पादविनाशाति
प्रसंगोत्पादविनाशकत्वोपपन्नधर्माश्रयभेदेन भेदोऽवश्यमभ्युपगन्तव्य इति वाच्यम् उत्पादविनाशादिकल्पनेनाप्य
तिगौरवप्रसक्तिः दीर्घत्वानित्यायाः सकलव्यक्तिसाधारण्यस्याङ्गीकारादेरङ्गीकर्तुं यौक्तिकत्वात् सिद्धान्तेन तु
रूपमपेक्षत्वेऽपि विषयतया निर्वाहात् न तत्कल्पने मानाभावपरिहृतमिति निर्बोधं ज्ञात्वाऽनन्त्यपरिहारेऽपि कार्यका
रणभावानन्त्यपरिहाराय सिन्धुमिश्रायेण शंकते न चान्त्रयमति (?) शाब्दबोधं प्रति तत्तद्व्यक्तिविशेष्यकत्व

महा
प्रभा
मु.
९

57

जन्यपदार्थोपस्थितेः शाब्दबोधहेतुत्वस्यासति संसर्गभानानुपपत्तेः नच योग्यताधीनशाब्दबोधे पदार्थस्य तदादेरपि
भानापत्तेर्वारणाय त्वयप्रतियोगितया न्वयबोधे भानस्य च शक्यपदजन्यपदार्थोपस्थितिप्रयोज्यत्वमुपगन्तव्यमिति वाच्यं
गोत्वाद्यवच्छिन्नगवादिविषयताकशाब्दबोधं प्रतिगोत्वादिनातिशक्तिज्ञानत्वेन कारणतायामेव स्वाभिमतत्वादिति प्रा
भाकरशंकामपाकर्तुं दोषान्तरमाह किंचेत्यादिना इति शक्तिग्रहः इत्याकारकः शक्तिग्रहः अवद्वाराधीनः
यदीति भवदभिमतः इति शेषः अतो शक्तिरिति सिध्यतीति शेषः अवद्वारस्य शक्तिप्रमापकस्याप्तधीनज्ञानस्य
देशेशक्त्यवगाहित्वात्तन्निष्ठेरावच्छेदकत्वादिरिति भावः यत्तु प्राभाकरमते अन्यथाख्यात्यभावात् ईदृशशक्तिज्ञान
स्य प्रमात्मकतया तद्धिष्ठसिद्धिरवश्यं दूनेत्याशयवर्णनं तदयुक्तं अन्यथाख्यात्यनुपगमेऽपि तस्य लाभिषिक्तस्य
कांशधर्मिविषयकत्वानङ्गीकारेणोपगमे नान्यथाख्यातिसमानफलकत्वसंभावनायां वस्तुसिद्धिप्रतिरोधक
त्वात् गोत्वशक्तिमितिदर्शित उत्पाजातिशक्तिरेव तावता सिध्यतीत्याशयः समानप्रकारकत्वेनेति दर्शितानां
कं अथपदधर्मिकस्यजातिशक्तिज्ञानस्य गोपदे गोत्वशक्तिमित्याद्याकारकस्यैव कारणतोपेयात स्य च घाटत्वे
गोत्वादिप्रकारकत्वात्तेन तत्प्रकारकस्मरणशाब्दबोधयोरनुपपत्तिरिति चेन्न शक्तिग्रहस्य पदेशोपदव्यागाहित्वे तस्य
तद्वगाहितोरेव स्मरणशाब्दबोधयोर्हेतुत्वात्सिद्धिप्रभाकरसिद्धान्ते तस्यैव विवक्षितत्वाच्च न पदवप्राप्तता
वशात् स्वत्वलाभसिद्धान्तः संगच्छते अन्यथा हि कार्यत्वप्रकारेण घटादौ लिङादिशक्तिग्रहस्तत्प्रकारेण शाब्दबोधानो
पपत्त्या पूर्वशक्तिग्रहानवच्छेदकत्वेन स्वानुपस्थितत्वेन पूर्वशक्तिग्रहासंभवभीत्या तादृशसिद्धान्तावतारो निष्प्रयो
जनक एव भवेदिति ननु कार्यत्वबाधकतापि प्रकारकस्यैव शाब्दबोधस्य समानाशे समानप्रकारकशक्तिज्ञानजन्यत्वं

गोत्वं शक्यमिति निशक्तिग्रह इति कारणमिति भावः व्यक्तिविषयत्वावच्छिन्नजातिशक्तिज्ञानत्वं कारणतावच्छेदकं घटितदारर्शितकारकज्ञानस्यापि शाब्दबोधकारणत्वं भवतीति कृतत्वं तन्नोपपद्यते तादृशज्ञानजन्योपस्थितिप्रकारकस्मरणशाब्दबोधयोः सम्भवादिति भावः तदेवोपपादयति समानप्रकारकत्वेनेति तत्तद्धर्मावच्छिन्नविषयताकस्मरणशाब्दबोधं च प्रति शक्तिविषयतानिरूपिततत्तद्धर्मावच्छिन्नविषयताघटितधर्मस्य जनकतावच्छेदकत्वमित्यादिरित्यर्थः तादृशनियमे मानाभावमाशंक्य दोषान्तरमाह किं च गोत्वेत्यादिना गोत्वे यदि शक्तिर्गोत्वादिविषयतानिरूपितशक्तिविषयताघटितो धर्मो यदि कारणतावच्छेदकः शक्यतावच्छेदकं वाच्यमिति शक्तिविषयतानिरूपितविषयताया अवच्छेदकतया कारणतावच्छेदकघटकमित्यर्थः ननु जातिविशिष्टव्यक्तिशक्तिवादिनो यथा गोत्वादिकं शक्यतावच्छेदकं न त्वस्ति मन्मते गोत्वत्वादिकं तथेतिशंकां निराकरणाय गौरवं दोषमभिधास्यन् तदुपपादनाय गोत्वत्वं निर्वक्ति गोत्वत्वमिति द्रव्यत्वादावतिप्रसङ्गभङ्गाय गवेतरासमवेतत्वं विशेषणं यत्किंचित्संबन्धेन गवेतरावृत्तित्वं द्रव्यत्वादेरपीति तथा निवेशेऽतिप्रसंगाभावात् विशेषणताविशेषणादिना कुत्रापि तस्यावृत्तेः सबन्धसामान्येन तद्वृत्तित्वोक्तौ तु गोत्वे तदसंभवः कालिकविशेषणतादिसंबन्धेन गवेतरस्मिन्नपि कालादौ तस्य वृत्तेरतः समवेतत्वपर्यन्तानुसरणं तावताऽप्रमेयत्वादावतिप्रसक्तमतो विशेष्यदलं तत्र समवेतत्वं गोसमवेतत्वं च गोरूपासाधारणनिरूपकत्वमतः सकलेतिसमवायप्रवेशाल्लुप्रमेयत्वादेरेव वारणायेति बोध्यं अनुप्रवेशादिनमपहाये त्यादिः इदमुपलक्षणं जातिविशिष्टव्यक्तिशक्तिमतेऽनवच्छिन्नगोत्वादिविषयतायाः कारणतावच्छेदकघटकता तदपेक्षयातदंशे बहूनामवच्छेदकतानां कारणतावच्छेदकतोपगमस्य गौरवापादकतयाऽपीति बोध्यं केचित्तु ननु यद

मरा
प्रभा
प्र·
८२

त्वावच्छिन्नगोत्वांशे शक्यत्वावगाहिनप्रकारताया अवश्यवाच्यतया प्रकारतावच्छेदकस्य गोत्वत्वस्य दर्शितरीत्या
वच्छेदकतासंसर्गेण शक्यतायां भानेनोपदर्शितार्थसिद्धेरव्याहतत्वात् नचैतादृशरीत्या शक्यतावच्छेदकतावगाहि
त्वसिद्धावपि तदंशे प्रामाण्यसंशयात्तेन विषयसिद्धिरिति वाच्यं विरोधिबाधकानवतारे प्रामाण्यसंशया
नुत्थितेस्तथा कार्यकारणभावादीनामप्यवच्छेदकतासिद्धावनाश्वासप्रसंगात् गौरवमिति पुनरस्य गोत्व
त्वस्य घटकानां भेदादीनामनुप्रवेशेन तद्गतिविशेष्यतावच्छेदकतानां कारणतावच्छेदककोटिप्रवेशेन गौरव
मित्यपि प्रत्येतव्यमिति भावः॥ जातिशक्तिर्यथासंभवमाकृतिरपि पदार्थः इत्यभिसंधाय व्यक्त्याकृतिजातयस्तु
पदार्थः इति महर्षिणा सूत्रितं तदेवयुक्तं संकेतग्राहकप्रमाणस्य व्यक्त्यादिसाधारण्यादित्यभिसंधायानुपसंहरति
तस्मादित्यादि ॥ अनुपपत्तेरिति ॥ जातिमात्रस्य शक्यत्वे व्यक्त्यादिभानानुपपत्तिरित्यभिसंधिनैव ॥ जात्याकृतिविशिष्टव्यक्ता
वेवेति ॥ एवकारेण केवलव्यक्त्याकृतिजातीनां निरासः ॥ विश्राम्यतीति पर्यवस्यति ॥ अभेदेनेति ॥ आकृतेः संस्थानविशेषा
त्मिकायाः स्वगतवैजात्यविशेषेण शक्यत्वे तत्तज्जातिवत् शक्यतावच्छेदकत्वसामानाधिकरण्यसंबंधविधया शक्य
तावच्छेदकतावच्छेदकत्वकल्पने गौरवाल्लाघवेन समवायसंबंधेन जातिमात्रस्यैव शक्यतावच्छेदकत्वसिद्धेः ॥ नचैवं कर्मत्वैकत्वादे
र्द्वितीयादीनामिव व्यक्त्याकृतिजातीनामप्येवं गोपदशक्यत्वमस्तु विशिष्टे शक्तिकल्पनमप्रयोजनकमिति वाच्यं तथा
सति गोत्वस्याकृतिविशेषे व्यक्तौ चैतत्प्रकारकस्य समूहालंबनबोधस्यैव प्रसंगात् ॥ एकपदार्थेनापरस्यान्वये निरा
कांक्षत्वात् ॥ अनुमितिवैशिष्ट्योपगमे गौरवात् ॥ किंच गोत्वत्वादेः शक्यतावच्छेदकतादिकल्पने गौरवस्यापरिहारात्
अपि च गोगोत्वाभावादेर्जात्याकृतिविरहेण प्रामाण्यापत्तिर्मृद्गवसंस्थाने गोसंस्थानगतजातिविशेषसाम्यात्

50

यैरभ्युपगतं तन्मते गोत्वादिज्ञाननिष्ठप्रकारकत्वमेवेति यदि ब्रूयात्तदाह किंचेति यद्यान्तरमनावलंबनेनैव सर्वदोषः संभव
तीत्यत उभयसाधारण्येन गौरवं दोषमाह किंचेति वस्तुतस्तु समानांशे समानप्रकारकत्वेनापेक्षितेऽपेक्ष्यते तत्र
कारसंबंधेकं तथा च स्वरूपसंबंधावच्छिन्नकार्यतानिरूपितावच्छेदकतानिरूपकत्वादित्यपि विशेष्यतानिरूपितश
क्तिप्रकारतानिरूपकज्ञानाद्दशासंसर्गावच्छिन्नकार्यताप्रकारकग्रहोनानुपपन्नः परं तत्प्रसिद्धकार्यतानिर्वाहाय प्रसिद्ध
कार्यमानयोपपन्नावश्यादिति दर्शितसिद्धान्तरहस्यं एवं च पदधर्मिकशक्तिज्ञानस्पर्शिताकारकस्यैव विवक्षितत्वे।
नाधेयत्वेन वा संसर्गेण शक्तत्वांशे गोत्वादिज्ञाननिष्ठप्रकारकत्वमात्समवायसंसर्गावच्छिन्नगोत्वनिष्ठावच्छिन्नावच्छेदकता
निरूपकविषयतानिरूपितशक्तिविषयताकत्वविरहेण समवायसंसर्गावच्छिन्नावच्छिन्नगोत्वप्रकारताकस्मर
णस्याहेतोधानजंकानिङजंपमेवातत्वादृशकार्यकारणभावानियमशंकया किंचेत्यादिदूषणान्तरावतारणं
युक्तमिति सारं शक्यतावच्छेदकं चाप्यमिति गोत्वत्वावच्छिन्नविशेष्यताकपदगोत्वशक्तिग्रहोद्देशनंतु शक्तं
शेनिधर्मितावच्छेदककोधर्मान्तरधर्मितावच्छेदककोवागोत्वेनगोपदशाब्दमित्याकारकबाधनिश्चयप्रतिब
ध्यतयानस्य कारणतानोक्तिमात्र गोत्वत्वावच्छिन्ने शक्तिमत्त्वग्राहकमानस्याग्रहः पारतंत्र्येणावच्छेदकतयाऽ
त्वत्वेऽपितामवगाहतेऽशक्यतावच्छेदकतासिद्धिरभावादतेति भावः नच पदं गोत्वशक्तमित्याकारकप्रत्ययदोषस्तु
कारणं तत्र गोत्वत्वावच्छिन्नस्य धर्मिताविरहेण सधर्मितावच्छेदककत्वानुरोधात् गोत्वत्वमानावगाहीभावश्चेति
नदर्शितप्रकारगोत्वे शक्यतावच्छेदकत्वसिद्धिरिति वाच्यं तथा सत्यपि पदं गोत्वशक्तमित्याकारकबाधनिश्च
यप्रतिबध्यत्वेन गोत्वांशेऽन्यप्रकारकस्य गोत्वत्वातिरिक्तप्रकारकस्य वा धियः कारणतापत्तेः क्रमशः तन्न यागोत्व

विशिष्ट
बुद्धित्वादिति
तद्विषयतया
ज्ञात्वे ५

महा
भा
प्र
८८

59

नभस्याद्ये कर्मितिवाच्यं गोपदार्थानवबोधविषयतानाघटते दर्केकस्मिन्नैकार्थसंगादकत्वात् विषयतादीनामतिरि
क्तपदार्थतायाः सिद्धं नसिद्धत्वेनाप्रथमेदस्मृतरभेदकत्वात् अप्रसक्तिकानारिवचनानरोधिनः आकृत्यग्रतीताव
पिगोत्वादिविशिष्टस्य गवादेर्गवादिपदादन्वयबोधस्यानुभविकतया जातिविशिष्टव्यक्तावेव शक्तिर्नाकृतौ।
विशिष्टे आकृतौ तन्मात्रशक्तिर्व्यक्ताकृत्योरेकपदोपस्थाप्ययोरपि तुल्यत्वेन विशेष्यानपरस्परमन्वयबोधः नव
त्वक्षैकवचनस्वरसभंगः शंकनीयः जातिव्यक्त्योरैकपात्त्ववगमेनदीपतात्पर्यादितिमन्यते केचित्तु सूत्र
स्थमाकृतिपदं तत्संस्थानपरं किंतु करणसुत्पत्याकारनिरूपकार्थकं जातिव्यक्त्योः समवायात्मकसंसर्गप
रमेवातः समवायभानावश्यंभावेन तत्रव्यक्तेरावश्यकतया तत्प्रदर्शकतयाम हृदैन्यूनताशंकापि परिहृतात्
वजातिसंस्थानोभयविशिष्टव्यक्तिबोधस्यानुभविकस्यानुपपत्तिरितिवाच्यं तदुभयविशिष्टेशक्तिभ्रमेणलक्षण
यावाक्यविनादृशबोधोपपत्तेरित्याहुः इदंचनरिहालोचनीयं आकृतिः संस्थानमवयवसंयोगविशेषस्तत्रवि
शेषो जातिविशेषएवतद्वद्वृत्त्यस्मसंस्थानव्यक्तिविशेषणत्वं स्वाश्रयसमवेतत्वसंसर्गेण तद्वद्वृत्त्यसंयोगाव
वयवकत्वं वा विशेषणताविशेषेण अथगवादिसंस्थानानुगतानतिप्रसक्तजातिर्नसंभवति अन्यतरकर्मज
त्वादिनासांकर्यात् नचान्यतरकर्मजत्वादिव्याप्यतादृशजातियौगीकार्या इतिनसंकरइतिवाच्यं तथास
त्यपितादृशतानाजात्यनुगमकानतिप्रसक्तधर्माभावेन तासांशक्यतावच्छेदकतायाः स्वेयत्वादितिचेन्न
अन्यतरकर्मजत्वादीनामेवगवादिसंस्थानानुगतानतिप्रसक्तनानाजातिव्याप्यत्वेनसंकरविरहात् पकै
कस्यागवादिसंस्थानगतजातेः शक्यतावच्छेदकतायाः सुवचत्वात् नचतादृशसंस्थानानुगमकजातेर्नाना

धर्मिस्य ५

तथा च तस्य विभिन्नसंस्थानत्वं गवयत्वमिति तादृशसास्नादिमत्त्वस्यैव वादाद्यभावापत्तिरिति चेन्न तत्र गोपदेन गोसंस्थानसदृशसंस्था
नवतो लक्षणया बोधनेनासास्नादिमत्त्वविरहात् एतेन स्वार्थनिमित्तपदार्थजातिविशिष्टव्यक्तिमात्रपरतायां अत्राकृति
जातौ तात्पर्ये केवलमात्रपरतायां च लक्षणैव प्रकारतां जात्याकृतिविशिष्टव्यक्त्यादेः कस्यचिल्लक्षणत्वात् यथा गुरुम
तेन्निः कार्यं प्रतीतिर्लौकिकार्थान्तरप्रयोगो लक्षणयैवेति न च जातेरेव शक्यतावच्छेदकतालाघवात्तद्वत्सं
स्थानस्य संसर्गमर्यादावच्छेदकतावच्छेदकस्योपरेवाक्ष्यः कथमन्यथा विशिष्टशक्तिर्जातिविशिष्टलक्षणा वा समाधे
येति वाच्यं संस्थानवद्दर्शकानां गवादिपदानां जातिसंस्थानोभयविशिष्ट एव शक्तानया मिलितानां प्रयोगमे
व शक्यतावच्छेदकत्वेन तथा तदेकपदविषयोऽपि लक्षणया प्रामाण्यकत्वात् अत एव आकृतिजातयस्तु पदार्थ इति
सूत्रे पदार्थ इत्येकवचनेनैकस्य व शक्यत्व प्रयाणमेकतोपविष्टपदतासूचनेन मदर्थे संभवनेन स्मैव शक्यता वधारणात् इ
ति मणिकृतः स्वरूपस्थिपदानां जातिविशिष्टे एव शक्तिः स्वदर्शकानामव्याप्तसंभवतस्य लाभिप्रायेणैव मदर्थिता
सूचितत्वेनादेष्यात्तत्पदवाच्यजातिकार्थेकारणादिपदानां जातिशक्ततावीरदेशिनः तिन्ना इत्यादिशक्तेः सू
त्राविषयत्वात् अथ किमिदं प्रवृत्तिनिमित्तत्वं जातिशक्यतेति यदि दृश्य वृत्तिज्ञानविषयतावच्छेदकास्तदा
दिरूपीत्यविशेषः यदि तीव्रवेद्या विषयतासानेराविरूपकस्य विषयतायां भेदस्तत्तदवच्छेदकभेदसंपन्नदोषेभावाद्वि
षयापेक्षया तु आश्रयभेदस्य तथाभावेऽपि नैकत्ववायत्ताशीति चेत् न उच्यते गवादिपदजन्यबोधविषयताप्रकारतानिरूपि
तेन वेद्याविशेष्यतासा गवादिपदशक्तिः सा च अस्मात्कृतिजातिषु केवलं निरूपकीभूताया ला इत्यादिविषयताप्र
कारतापेक्षया विशेष्यकारस्य भेदस्य विशेष्यताभेदकत्वात् न च गवादिपदप्रकारतानां मुख्यप्रयये भेदः

मदा

प्रमा० घा० ८५

रूपवदित्यस्यापि प्रामाण्यापत्तिः तद्वत्तादेरपि सकलसर्वपदानुगतसर्वपदानुगमकं वच्छिन्नान्वयितावच्छेदकतयानन्वयाप
करूपव्याप्यसकलवत्ताघनुगतस्यावत्ताघवच्छेदेन रूपादिमत्त्वाबाधादिति वाच्यं सर्वेनानात्वाद्युद्दिश्य शक्ततायाः सि
द्धांतसिद्धतयातादृशानुगमकवच्छिन्नतत्तद्गुणसमुदायोच्चारणप्रयोजकत्वादिविषयताविशेषस्यतादृशधर्मस्यविशे
षणीयत्वात् दूषितत्प्रयोगप्रामाण्यवारणायैवसामानाधिकरण्यमपहाय व्यापकतायानिवेशनं रूपत्वव्यापक
स्यापि सर्वत्वस्य रूपसामानाधिकरण्यानपायात् अवान्तिप्रसंगस्यभंगाय व्याप्यतानिवेशः यद्यपि सर्वत्वेनविस्त
रितादावभेदसंसर्गेणसर्वपदार्थान्वयादेरसत्त्वात् ताकात्स्यगतिः संभवतीति केवलान्वयिसर्वत्वावच्छिन्ने सर्वप
दशक्तिस्तादृशगौणार्थतिनत्त्वत्वे व्याप्यभेदसंसर्गेणपदार्थान्तरान्वयसाकांक्षसर्वपदसंवेतभेदसंसर्गेणान्वयप्रयो
जनकमितिशक्तेनवक्तुं तथापि पदार्थान्तरे भेदान्वयसाकांक्षस्यैव सर्वपदस्य दर्शितानुमतिरितिशक्तिप्रायोपि

७ सर्वत्र

त्तुतदुपन्यस्तमिति ध्येयं केचित्तु सर्वपदशक्तिः केवलान्वयिसर्वत्वावच्छिन्ने एव केवलान्वयित्वं चेष्टतिमद्भावप्रति
योगित्वाविरहवत्त्वं सर्वपदार्थाभेदान्वयसाकांक्षपदान्तरसत्त्वस्थलेन दृष्टमेकेवलान्वयिताघटकत्वेनोनिरूपित

60

त्वसंसर्गेणान्वयस्तुत्सत्सदाभान्वयातिरेकिणोप्यसंग्रहः एतदर्थमेवस्वनिमत्वभावविशेषणमस्मिकाङ्गतानां
वादिसंग्रहस्यप्रकृतानुपयोगित्वादिति वदंति तन्नसद् दूषितत्वस्वसत्त्वोपपत्तेर्व्यतिरेकिस्थले केवलान्वयिता
तर्भावेणसंकेतकल्पनस्य गौरवेणान्याय्यत्वात् नच दर्शितत्त्वस्वसत्त्वाविशिष्टव्याप्यव्यापकभावनिवेशाद्गौरवमति
रिच्यतइति वाच्यं तत्रोपलक्षणतयातन्निवेशेनतत्प्रयुक्तशक्ततावच्छेदकशरीरगौरवाभावात् नच समभाप्तु
पलक्षणतयाकेवलान्वयिताप्रवेशात्गौरवातिरेकइतिशक्यमेववक्तुं तथासतिकेवलान्वयितावच्छेदकशाक्तौ

त्वांगीकारेणापि संकरभंगभयाद्विघटितं द्वारस्मिन्निति वाच्यं गवाकृतिरित्याद्यनुगतप्रतीतिबलेनैतदनुगतजा
तिसिद्धेरेव स्फुटत्वात् न चाद्यमन्यतरकर्मजः संयोगः इत्याद्यनुगतप्रतीत्यान्यतरकर्मत्वादिकमप्यनुगतं इ
वोऽस्मिन्निति वाच्यं तादृशप्रतीतेरन्यतरकर्मजन्यत्वादिना अनुगतजन्यतात्वाद्यवच्छिन्नेनोपाधिनोपपत्तेः अनुगत
प्रत्ययबलेन जातिसिद्धौ संकरोपि न बाधकः इत्यादि प्रदर्शितं न च सिद्धांते तु नानुपपत्तिर्योधीपुनीति धियो विदांकु
र्वन् अभेदसंसर्गकत्वांशे त्वपि तावच्छेदकधर्मव्यापकत्वात् तथा धर्मावच्छिन्नान्वयितावच्छेदकावच्छिन्नव्याप्य
धर्मः सर्वपदार्थः तादृशो धर्मो यस्य स इति व्यापकत्वादिकं न त्वेकचित्तविषयकत्वादि तदपेक्षाबुद्धिविशेषविषय
७ कं त्वादिकं स्वावेमन्यदेव न सर्वद्रव्यगुणादिव्यासक्तस्वपदार्थसर्वपदार्थनिरूपितत्वं तादृशान्वयितावच्छेदकमुद्देश्यता
वच्छेदकीभूतद्रव्यत्वादिकं तद्व्यापकीभूतं तदवच्छिन्नान्वयितावच्छेदकीभूतगुणत्वाद्यवच्छिन्नव्याप्यतापन्नं वस
र्वद्रव्यानुगतव्यापकत्वादिकं तथा सर्वत्वेनोपस्थितौ द्वितीयपार्थक्येनैव इति विषयतादेरन्वयिसर्वपदार्थान्वयिता
वच्छेदकत्वादिति प्रसंगतस्समागताऽभेदसंसर्गकेति स्वपदार्थसमभिव्याहृतैकत्वादिविश्रान्ततया विशिष्टानुसंधेयावच्छिन्न
वाक्यसमुदायरूपं सर्वपदेनैवोपादातुं शक्यमिति तत्कृमायमतः सर्वपदानुपूर्वी स्वपदार्थीकृतस्वावच्छिन्नविष
यताकत्वमिति ज्ञानजन्यबोधविषयतावच्छेदकतापर्यवसिते स्वावच्छिन्नार्थान्वयितावच्छेदकत्वं स्वार्थान्वयिता
वच्छेदकतास्थले निवेशनीयं तथा च व्यतिरेकिणस्तादृशावच्छेदकता अप्यव्यापकत्वाप्रसिद्ध्यादोषोऽतत्तद्धार
णाय तादृशायत्किंचिद्धर्मव्यापकत्वव्यापकतासंसर्गेण तादृशधर्मवत्त्वादिपर्यवसिते विवक्षीणे नत्वेवं तादृ
शान्वयितात्वव्यापकतामात्रनिवेशो व्यतिरेकिणि सर्वत्वेऽप्रसङ्गा इति तद्वारणाय अवच्छेदकगर्भतादरः नन्वेवं सर्वद्रव्य

गदा
प्रमा
पू०
८५

61

वृत्तेः सर्वत्वस्यैकत्वावच्छेदेन व्याप्यवत्त्वमात्रवृत्तित्वादसंभवादुक्तत्वात् । न च समवायसंसर्गेण व्यापकतानिवेशनी
यैतिन कश्चिद्दोषः इति वाच्यं सर्वाणि सामान्यानीत्यादौ सामान्याकिन्त सर्वत्वस्यापेक्षाबुद्धिविषयत्व विशेषात्मक
स्य समवायेनावृत्तसात न संसर्गावच्छिन्नव्यापकतासंभवेनासंग्रहात् । अत एव स्वरूपसंसर्गावच्छिन्नयापि व्यापक
ताया निवेशापि तु शक्या तेन संबंधेनावर्तमानस्य घटादिगत सर्वत्वस्य सत्त्वात्तत्कस्यासंग्रहप्रसङ्गात् । अतः स्व
रूपसमवायान्यतरसंसर्गावच्छिन्न तेन व्यापकतानिवेशनीया । वस्तुतस्तु प्रतियोगित्वेऽधिकरणेनाभावविशि
ष्टप्रतियोगिसंसर्गावच्छिन्नापि व्यापकता संनिवेश्या । अत एव वैशिष्ट्यव्यासज्यवृत्तिधर्म्मावच्छिन्नप्रतियोगिताकसम
भावमादायापि न दोषः । एतेन सामान्यादिगतसर्वत्वादिकमपि संग्राह्यमेव पर्याप्तिसंसर्गेणैव वर्त्तते समवायेन तु
क्वापि न स्यान्नहि तिरिति मते समवायस्वरूपान्यतरसंसर्गावच्छिन्नत्वेन व्यापकताया निवेशेऽपि तु न शक्यत्वेऽपि न
त्वतिः पर्याप्तिसंसर्गेण तादृशसामान्यसर्वत्वस्य व्यापकतायां तरितिनत्वं । नेष्टत्वं कथमन्वयितावच्छेदकस्यापि
करणत्वमन्वयितावच्छेदकतावच्छेदकसंसर्गावच्छिन्नतया निवेशनीयं तादृशधर्म्मावच्छिन्नान्वयितावच्छेदका
वच्छिन्नव्याप्यत्वमपि पर्याप्तिसंसर्गावच्छिन्नमुपादेयं । तादृशसंसर्गेण स्वाधिकरणे वर्त्तमानो यः स्वप्रतियोगि
तावच्छेदकावच्छिन्नाधिकरणतोऽभाववृत्तितादृशप्रतियोगिताया तादृशान्वयितावच्छेदकसंसर्गावच्छिन्नाया तादृ
शान्वयितावच्छेदकतावच्छेदकसंसर्गावच्छिन्नावच्छेदकताशून्यः तादृशान्वयितावच्छेदकत्वपर्यवसितत्वे
र्थ इति विवादः दर्शितदिशा परिष्कार्यः । व्यापकत्वव्याप्यत्वे च स्वरूपसंसर्गावच्छिन्नमुपादेयमन्यतराश्रयपर्याप्ति
नियोगीधर्म्मः सर्वपदप्रवृत्तिनिमित्तं वाच्यं दर्शितान्यतरत्वेन संसर्गानिवेशेन लाघवादिति तु केचिद् भ्रमिताः

रत्वातिरेकः तिमा कालेवकं तथा सति केवलान्वयिताघटकहलौ समभिव्याहृतपदार्थान्वयत्वस्यान्यतमल
पितत्वापत्तेः शक्यतावच्छेदकोपलक्षणस्य बोधेऽभानात् ज्ञानत्वयोरुक्तेरसंभवात् एतेन निरुक्तकेवलान्वयित्वे
मेव सर्वज्ञसर्वपदार्थः सर्ववेत्तीत्यादौ द्वितीयार्थविषयतायां तदन्वयात् केवलान्वयित्वविषयताकज्ञान
वानित्याद्याकारको बोधः सर्वं घटरूपवदित्यादौ तु सर्वपदार्थैकदेशघटत्वादेर्निरूपितत्वसंसर्गेणा
न्वयः केवलान्वयित्वस्य रूपादौ वितिघट रूपभावप्रतियोगितानवच्छेदकरूपतावच्छिन्नत्वात् घटः इत्याद्याका
रको बोधः घटः सर्वरूपवानित्यादौ तादृशसंसर्गावच्छिन्नायाः रूपत्वसमनाभावप्रतियोगितायाः तादृशान्यो
न्याभावप्रतियोगितावच्छेदकतायाश्चावच्छेदकतानिरूपकत्वादिभासतः निरूपकत्वाभावप्रतियोगितावच्छे
दकताविरहवद्घटत्वावच्छिन्नो रूपवानित्याद्याकारकबोधानन्तरं तादृशप्रयोगप्रामाण्यसिद्धावपि दोषो निरस्तः बोध ७
दर्शितरीत्या सामान्यस्य शक्यतावच्छेदकगौरवादरस्यानुचितत्वात् सर्ववेत्तीत्यादौ सर्वविषयकबोधस्यैवानुभ
विकत्वात् केवलान्वयिताबोधस्याननुभविकत्वाच्च किञ्च सर्वे घटा रूपवन्त इत्यादौ द्विधावदादिपदार्थान्वये
निराकांक्षत्वात् उक्तयुक्तेर्नोपपत्तेऽनुमितिवैविध्यादरस्यानुचितत्वात् अपि च घटः सर्वरूपवानित्यादावनव
च्छिन्नवत्त्वाद्यवच्छिन्नविशेष्यताकस्यैव बोधस्यानुभविकत्वात् तमुपलभ्य दर्शितव्यापकतावच्छेदकत्वेन
घटत्वाद्यवगाहिबोधोपगमे साहसम् यावत्पदस्यापि केवलान्वयिताबोधे नैयत्यापत्तेरुक्तत्वात् तस्मादिति
तीयतया तद्व्यावृत्त्यनुपपत्तेः न च किंचिन्नतितद्रूपवृत्ते छिन्नतोत्पादेः प्रामाण्यापत्तेश्च समभिव्याहृतपदार्थतावच्छेदके-
न तद्व्यक्तित्वादिना सजातीयताप्रसिद्धेः स्वस्मिन्नप्रसिद्धस्य सजातीयत्वस्य स्वोत्तरकालावच्छिन्नसमानाधिकरण्या-
प्रसिद्ध्या किंचित्करत्वात् किं तु स्ववृत्तिकत्वेनावच्छिन्नाभयवृत्तितासून्यजातिमत्त्वं तादृशी च जातिर्यथा चैत्रादिश-
रीरेष्ववस्थाभेदभिन्नेष्वनुगतं चैत्रत्वादिकं तथावयवोपचयापचयादिना भिन्नमानेष्वतवृत्तादिष्ववैजात्यतवृत्तत्वादिकं
स एवायं वृत्त इत्यादिप्रतीतेर्विषयतया प्रामाणिकं तादृशप्रतीतिरूपविनावयवकेवृत्तान्तरे तत्व्यक्तभेदावगाहितया
मप्रामाण्यापत्तेः सामान्यरूपेण साजात्यविषयकत्वे दृष्टान्तरीयेपि वृत्तान्तरे तादृशप्रतीतेः प्रामाण्यापत्तेः न वृत्तावय-
वारब्धवृत्तत्वादिविषयकत्वेन सर्वैस्तदीयावयवैः पुनः संयुज्यमाने तदवयवैर्वृत्तान्तरेपि तादृशप्रतीतिप्रामाण्यापत्तेः
तस्मादस्त्येव जात्यन्तरमवयवोपचयापचयाभिन्नेष्वतवृत्तसन्तानेष्वनुगतं एवं सर्वत्रैव स एवायमिति प्रत्ययप्रमाथितं जात्य-
न तरं मूर्ध्नि मात्रे च नु संधेयं तेन कस्यापि छिद्यमानस्य तादृशसाजात्याप्रसिद्धेः इयं च शाखाया छिद्यमानाया शाखा छिन्न-
नीत्येव प्रमाणं न तु वृत्तोच्छिन्नतीत्येतदनुपपद्यते तच्छाखातिरिक्तावयवेषु तादृशवैजात्यावच्छिन्नवृत्तस्यानुवृत्तत्वात् तच्छा

सदा
प्रभा
पू:
१५५

यातामित्यनेनाध्ययनमेतद्यागोपयोग्यतिरिक्तं निषिध्यत इति नायोग्यत्वंशङ्कावच्छेदेनापीत्यपि प्रत्युक्तं तथा सति
निषादेतरशङ्कस्यापि तद्यागोपयोग्यध्ययनानिषेधेनानिष्टप्रसंगात्तस्मैवं निषादकर्तृके तद्यागोपयोग्यध्ययनाति
रिक्ताध्ययनेनाधीयातामित्यनेन निषिध्यते तावतैवापवादविषयपरीहारसिद्धौ तद्देवं चेतद्यागोपयोग्यध्ययनेनाध्ययने
निषादस्यानधिकारस्य दितरशूद्राणामध्ययनस्यासामान्याधिकारस्य फलितो भवतीति न किंचिदनिष्टं तदुक्तं मणिकृता
ईश्वरनिषादस्यैव यागान्तरफलविद्याप्रयुक्तिरादिश्यते इति अत्र निषादस्थपतिं याजयेत् तथा विशेष्यसमर्पकत्वेन गुणव
चनस्यापि निशाद्रस्य विशेषणसमासेऽपि निषादानामपि माठरकराजकेत्यादिवत्समाद्यपतिके चित् तन्मते जातिशब्दानां
विशेष्यसमर्पकत्वनियमे मानाभावेन शंकान्तुपित्या राजवेनादित्वकल्पनानानाग्रहादिति तन्मते कर्मधारयलक्षणं
तु स्वावच्छिन्नघटकतावच्छेदकावच्छिन्नोपस्थाप्यतावच्छेदकं नानाघटितस्वावच्छिन्नघटकतावच्छेदकावच्छिन्नोपस्था
प्यतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितस्वावच्छिन्नघटकतावच्छेदकावच्छिन्नोपस्थाप्यतावच्छेदकावच्छिन्नमुख
विशेष्यतानिरूपकबोधजनकतावच्छेदकस्वावच्छिन्नविषयताकानुपूर्वीमत्वमित्येतत्समासत्वं स्वपदानि विशेष्यीभू
तानुपूर्वीपराणि नीलोत्पलमित्यत्र नीलप्रकारकोत्पलविशेष्यकबोधजनकतां प्रति नीलोत्पलानुपूर्व्यवच्छिन्नविष
यताकं ज्ञानं कारणमिति नीलोत्पलानुपूर्व्यवच्छिन्नघटकतावच्छेदकनीलपदानुपूर्व्यवच्छिन्नोपस्थाप्यतावच्छेदकं
तदुपस्थाप्यतावच्छेदकं न तावदिति तत्र नीलत्वं नीलपदार्थविशेषिते तदवच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपि
तानादृशोपस्थाप्यतावच्छेदकेनोत्पलत्वेनावच्छिन्नाविशेष्यतानिरूपकस्य दर्शितानाकारकबोधस्य जनकतावच्छेदि
कानीलोत्पलानुपूर्व्यवच्छिन्नाविषयतेति निरुक्तलक्षणसमन्वयः नीलमुत्पलमितिवाक्यानुपूर्व्यवच्छिन्नविषयता

ज्ञानत्वावच्छिन्नकारणतायामपि स्कन्धाविच्छेदेन लक्षणया लदीयज्ञानस्य तदीयज्ञानत्वावच्छिन्नकारणता
यामस्कन्धस्य पितृदर्शितत्वेदाधीनबोधावच्छेदकत्वं प्राक्तिज्ञानत्वावच्छिन्नकल्पनमपेक्षणीयमिति ज्ञानत्वावच्छि
न्नकल्पने गौरवाधावतारस्यापरिहार्यत्वात् प्राक्तिज्ञानस्य तत्त्वोपयोगेश्वरस्कन्धतयाल लक्ष
ज्ञानकल्पनापेक्षया किंच तत्तल्लक्षणाज्ञानकल्पने लक्षणतावच्छेदकावच्छेदकावच्छिन्नविषयकबोधत्वावच्छि
न्नविषयकत्वेन तात्पर्यकल्पनमपि गौरवमावहति इत्यंच तात्पर्यविषयीभूतान्वयबोधस्य शाब्दत्वानुपपत्तेर्लक्ष
णाबीजस्यानवतारेणापि लाक्षणिकपदस्य इति तत्प्रकृताद्यो न हि तत्र निमित्तमाधानं तत्र मपि लब्धावसरमित्यवधेयं
अस्तत्पिलाद्यवबोधकाभावात्प्रयममतोऽभिहितेऽश्रुतार्थान्वयबोधे तत्पदस्य विधायकत्वकल्पने गौरवं नदोषा
यममाणवलोगौरवस्यादोषत्वात् इति निमित्तिकारसमाधानमनुक्तम् अध्ययननिषेधकस्य बाधकस्य सत्त्वात् तत्र तमाल
द्रवाधवतारान्नस्यादेतत् स्त्रीशूद्रौ नाधीयातामित्यनेन स्त्रीशूद्रयोरध्ययनाधिकारादिनिषेधः स्त्रीणामनाधिक
रणेन ननत्प्रतिपादनेऽध्ययनत्यागेन सर्वेषां निषेधपालनायत्याकेषांचिदध्ययने अदोषः एवमुक्ते तत्र पठेत निषा
दस्य विधायकत्वे तत्र निषेधवाक्यस्य योग्यतापतिरिति तत्र योग्यतायां सत्यां तदा निषादस्याध्ययनेऽधिकारतया
पेक्षणीयः नचापवादविषयपरिहारेणोत्सर्गप्रवृत्तेः सकलतन्त्रसिद्धतया ... गलमालभेतेत्यापवादेन
हिंस्यात्सर्वभूतानीत्यादिनिषेधानां वैधेतरहिंसाविषयकत्वावधारणवत् दर्शितलाघवादिप्रयुक्ता निषादस्य विधा
यकत्वे तज्जातीयत्वादिरूपस्तेन निषादादीतिरिक्तशूद्रविषयकत्वमध्ययननिषेधस्यावधारयितुं शक्यमिति
नापोद्यतां तावदिति वाच्यम् तथात्वे तद्योगापत्योगपत्तिरिति अध्ययनेऽपि निषादस्याधिकारसिद्ध्यापत्तेः एतेनाधी

गदा
प्रमा
पा.
१५६

निवेशः तन्मते प्रकारतावच्छेदकतानवच्छिन्नत्वं यदि तत्तत्स्वभिन्नत्वोभयसंबंधेन तादृशावच्छेदकशून्यत्वमेतत्पदस्याभि-
प्रायोऽर्थकत्वात् परिष्कारस्तु हेत्वाभासादौ दर्शितरीत्या सुधीभिः प्रतिसंधेयः एवं विशिष्टवैशिष्ट्यादितो हृदादौ विशे-
ष्यधर्मावच्छिन्नप्रकारकबोधो जायते तदीयहृदादिनिष्ठविशेष्यता धर्मावच्छिन्नत्वेनैव व्हि न त्वप्रकारतावच्छे-
दकधर्मावच्छिन्नोपस्थाप्यतावच्छेदकेन तादृशोपस्थाप्यतावच्छेदकतानवच्छिन्नत्ववत्त्वादिनावच्छिन्नतया
प्रकारतया निरूपिततां न निरूपकबोधजनकतावच्छेदकविषयतासूत्पदनिष्ठविशेष्यतानिरूपितावच्छिन्नत्वं तत्
संसर्गावच्छिन्नाधर्मावच्छिन्नत्वेनैवच्छिन्नेति न दृश्यातिप्रसंगः भंगायावच्छिन्नत्वं विशेष्यताविशेषणं हृदत्वस्य विशे-
ष्यतावच्छेदकत्वस्य तादृशहृदत्वप्रकारकोपस्थाप्यतानवच्छेदकत्वान्नातिप्रसंगः बहुव्रीहावतिव्याप्तिवारणाय प्रथम-
त्वेन विशेष्यताविशेषिता तदनुपादाने हि चित्रगुरित्यादितो जायमानस्य चित्रभिन्नगोसंबंधिविषयकबोधस्य स-
मासघटकोपस्थाप्यचित्रप्रकारतानिरूपिततादृशगोविशेष्यकबोधजनकत्वादतिव्याप्तिः तदुपादाने तु मुख्यत्वेन सं-
बंधांशप्रकारीभूतगोत्वनिविशेष्यतायास्तु मुख्यविशेष्यतात्वविरहान्नातिप्रसंगः न च गोपदस्य गोसंबंधिलक्ष-
कतया गोसंबंधित्वमेव तदुपस्थाप्यतावच्छेदकं न तु गोत्वमिति नातिप्रसक्तिरिति वाच्यं गोसंबंध्युपस्थितौ गोत्वावच्छि-
न्नभानानियमेन गोपदजन्योपस्थितिविषयतावच्छेदकतात्मकतदुपस्थाप्यतावच्छेदकताया गोत्वेऽनपायात् तादृश-
समासघटकतावच्छेदकगोपदानुपूर्व्यवच्छिन्ने न समासघटकगोपदान्तरेण गोत्वावच्छिन्नविषयताकोपस्थितिस्तत्र ता-
त्पर्यं तेनापि तादृशोपस्थाप्यतावच्छेदकतासौलभ्यात् एतेन जन्योपस्थितिमुख्यविशेष्यताकोपस्थाप्यतानि-
वेशयोगत्वस्योपस्थाप्यतावच्छेदकत्वमिदवारणीयमिति किरणमतं समासानिविष्टेन गोपदेन गोत्वविशे-

याश्चपि दर्शितविधिबोधजनकतावच्छेदकत्वानङ्गीकृतिप्रसंगभंगायसमासत्वमवेयः राजपुरुषादित्वपुरुषाद्यंत
प्रसंगभंगायसमस्तं तथ्यतिप्रसंगवारणायैवतत्र निरूपितांते विशेष्यता विशेषणांतरं तु पादानेदि राजपुरुषादिध
र्मिकैकत्वादिप्रकारकबोधं प्रति सुवादिधर्मिकराजपुरुषानुपूर्व्यवच्छिन्नप्रकारताकज्ञानत्वेन कारणतास्त्वेपिन
दृशासंख्याप्रकारता निरूपितविशेष्यतावच्छेदकस्य राजपुरुषानुपूर्व्यवच्छिन्नघटकतावच्छेदकराजपदानुपू
र्व्यवच्छिन्नोपस्थाप्यतावच्छेदकराजसंबंधित्वतादृशोपस्थाप्यतावच्छेदकपुरुषत्वोभयपर्याप्तत्वं तथालक्षणघटक
त्वेन यद्यपि राजपुरुषादौ नातिप्रसंगस्तथापिसमादाय रक्तंहेः हिनकुलमित्यादावतिप्रसंगो भवत्येव तत्र प्रत्येकमेक
त्वानुपपत्तेरिति न तेनतद्धीनवोधीये कारयप्रकारता निरूपितविशेष्यतायाः प्रत्येकपदोपस्थाप्यतावच्छेदकम
त्रावच्छिन्नत्वात् तथा चाहितातं राजपुरुषादावतिव्याप्तिवारणाय राजपुरुषानुपूर्व्यवच्छिन्नघटकतावच्छेदकराजपदानु
पूर्व्यवच्छिन्नोपस्थाप्यतावच्छेदकं राजसंबंधित्वं तादृशपुरुषपदोपस्थाप्यतावच्छेदकेन राजत्वेनघटितमिति नातिप्रसंगः
६ पं त्वस्य स्वघटितत्वेनासंभवस्य वारणाय तत्र पदं श्रुत्यैव सुत्पलकालीनोत्पलमित्यादिकर्मधारयाव्याप्तिरिति तत्पदो
पस्थाप्यतावच्छेदकेनोत्पलत्वेन घटितत्वात् पूर्वपदोपस्थाप्यतावच्छेदकस्योत्पलकालीनत्वस्यानवच्छिन्नप्रका
रतायालक्षणघटकत्वादिति चेन्न स्वावच्छिन्नोपस्थाप्यतावच्छेदकत्वस्वावच्छिन्नोपस्थाप्यतावच्छेदकान्तराघ
टितत्वोभयसंबंधेन स्वावच्छिन्नघटकतावच्छेदकावच्छिन्नधर्मावच्छिन्नत्वस्य विवक्षितत्वादुत्पलत्वस्य पदांतरोपस्था
प्यतावच्छेदकतया तद्घटितेप्युत्पलकालीनत्वे पदघटकतावच्छेदकस्य संबंधद्वयस्यानेन लक्षणघटनान्नासंगः
राजसंबंधित्वमपि न तादृशराजपदानुपूर्व्यादेरेकस्य राजपुरुषानुपूर्व्यवच्छिन्नघटकतावच्छेदकस्योभयसंबंधासत्वान्न

महा
प्रभा
ष्टा°
८५

१०८

ष्यापत्तिश्चाप्यनुद्धारात् तस्मात् स्वरूपान्तिमसंसर्गभिन्नप्रकारतावच्छिन्नघटकतावच्छेदकविशिष्टधर्मावच्छिन्नत्वावच्छेदकताप
र्य्याप्त्यनुयोगिताकत्वं प्रकारताविशेषणमवच्छिन्नान्तेन विवक्षणीयं तत्र वैशिष्ट्यं स्वावच्छिन्नोपस्थाप्यतावच्छेदकतापर्य्या
प्त्यनुयोगितावच्छेदकस्वावच्छिन्नोपस्थाप्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकाभाववत्त्वोभयसंबंधेन स्वभिन्नत्वस्याव
च्छिन्नावच्छेदकतापर्य्याप्त्यनुयोगिताकविषयताशून्यप्रतीतिविषयतावच्छेदकतापर्य्याप्त्यनुयोगितानवच्छेदकत्वोभयसं
सर्गावच्छिन्नतादृशपर्य्याप्त्यनुयोगितावच्छेदकतावच्छिन्नप्रतियोगिताकात्यंताभाववत्त्वं तादृशावच्छेदकताकप्रतियोगि
ताकान्योन्याभाववत्त्वं वा परिष्कृतो द्वितीयः संबंधः एवं च राजपुरुषादौ नातिव्याप्तिः राजसंबंधित्वावच्छिन्नप्रकारतावच्छे
दकतापर्य्याप्त्यनुयोगितावच्छेदकस्य तादृशविशिष्टविषयकधीविशेषस्पर्शितोभयसंबंधेन राजपदानुपूर्वीमत्त्ववि
रहात् स्वावच्छिन्नोपस्थाप्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकतात्मकप्रथमसंबंधस्य संबंधित्वावच्छिन्नावच्छे
दकतापर्य्याप्त्यनुयोगितावच्छेदकस्य राजत्वविषयकधीविशेषस्य द्वितीयसंबंधघटकाभावप्रतियोगितावच्छेदक
संबंधद्वयघटितत्वेन द्वितीयसंबंधासत्त्वात् राजसंबंधित्वात्मकविशिष्टविषयकधीविशेषस्य राजत्वविषयकधीविशेषादन्य
त्वात् तदवच्छिन्नावच्छेदकतापर्य्याप्त्यनुयोगिताकविषयताशून्यप्रतीतिविषयतावच्छेदकतापर्य्याप्त्यनुयोगितानवच्छेदक
त्वाच्च यादृशतादृशविशिष्टविषयिकाप्रतीतिः सावश्यं विशेषणीभूतं राजानं विषयीकरोति तद्वृत्तिविषयतावच्छेदकता
यात्तदवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वं राजत्वविषयकधीविशेषेऽस्ति इत्थं च नीलो
त्पलानुपूर्व्यवच्छिन्नघटकतावच्छेदकनीलपदानुपूर्व्यवच्छिन्नोपस्थाप्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकस्य धी
विशेषात्मकनीलत्वैकत्वप्रदर्शिताभावात्मकद्वितीयसंबंधप्रतियोगितावच्छेदकसंबंधद्वयवत्त्वेन नीलाश्रयप्रकारताव

ष्कोपस्थितिजननात् अत एव नीलो राजपुरुष इत्यादिना प्रकृतजबोधीयप्रकारतावच्छेदकराजसंबंधित्वादेरुद्दे
कराजपदार्थोपस्थाप्यतावच्छेदकराजत्वादिविरहेण नीलत्वं समवेतं अत एवं राजसंबंधिपुरुषस्यादिकमधारयाभामिः
तद्धीनबोधीयपुरुषत्वावच्छिन्नमुख्यविशेष्यतानिरूपितप्रकारतावच्छेदकराजसंबंधित्वस्यानद्धटकतावच्छेदक
राजसंबंधिशाब्दानुभवावच्छिन्नोपस्थाप्यतावच्छेदकराजत्ववत्त्वेनाविनिवेशेन तत्पदोपस्थाप्यताराजनोपस्थिति
मुख्यविशेष्यतानुपपादानिवेशनीयत्वात् राजत्वस्य तात्पर्योपस्थाप्यतावच्छेदकताविरहेण तद्धटितत्वस्य किंचिक
रत्वात् राजपदानुपूर्व्यां सत्यां तादृशसमासघटकतावच्छेदकत्वेपि तद्वच्छिन्नोपस्थाप्यतावच्छेदकत्वस्य मुख्यविशेष्यत्व
घटितत्वेनैव तात्पर्ये सत्वेपि तद्घटितत्वस्य राजसंबंधित्वे सत्वेपि च राजसंबंधित्वे पतद्घटकतावच्छेदकानुपूर्व्यावच्छि
न्नतत्पुरुषघटकराजपदोपस्थाप्यतावच्छेदकत्वस्य सत्वेपि च राजसंबंधिशाब्दानुभवेऽः प्रकृतसमासघटकतावच्छे
दिकापादर्शितसंबंधघटकस्य राजसंबंधित्वेन पाणाव्यकाचितत्वात् कृष्णसर्पो इत्यादिकमधारयजेपि बोधे कृष्णादेर
र्थस्य प्रकारतायाः प्राक् चावच्छ्यापितत्वात् प्रसंगः नीलोत्पलादिकमधारयसमासात् शुक्लीकृततत्पुरुषादावति
प्रसंगाभंगो द्वंद्वलक्षणोक्तरीत्या तादृशबोधादिप्रयोजकतावेशिष्ट्येनानुपूर्वी विशेषणेन संपादनीयत्वादिकं केचि
दाचक्षते तन्नसाधीयः नीलपदोपस्थाप्यतावच्छेदकस्य नीलपदार्थवृत्तितनीलत्वस्य तदुपस्थाप्यतावच्छेदकनीलत्व
जात्यवच्छिन्नवृत्तित्वेन लक्षणाघटकतया नीलोत्पलादावव्याप्तेः नचनीलत्वादिविषयकप्रतीतिनिरूपितत्वाद्य
वच्छिन्नविषयतावत्त्वान्न नीलस्य नीलत्वघटितत्वमितिवाच्यं तथापि राजत्वादिविषयकप्रतीतिनिरूपितविषय
तायाः प्रमेयत्वाद्यवच्छिन्नापन्नराजसंबंधित्वेनाप्रकारतया विशेष्यकप्रकारतावच्छेदक तथा राजपुरुषादिन प्र

मदा प्रमा पृ० १५८

तन्मते तत्पुरुषादौ पूर्वपदादेः संबंधिलक्षणानियमेऽपि व्युत्पत्त्यनुरोधात् समासविग्रहयोस्तुल्यार्थकताव्यभिचारेणानुपपत्तिसं
कोच्यधर्मे लक्षणादरणस्यानावश्यकतया तत्तत्पदस्य निर्दोषतायाः प्रागावेदितत्वात् किंच प्रत्येकमपि विश्रांतार्थकस्वपरे
तरार्थसमुदायात्मकसमासस्योपादानमशक्यतया स्वावच्छिन्नवृत्त्यवच्छेदकतावच्छेदकावच्छिन्नोपस्थापकतावच्छेदकावच्छिन्नाभेद
संसर्गावच्छिन्नप्रकारतानिरूपितस्वावच्छिन्नवृत्त्यवच्छेदकतावच्छेदकावच्छिन्नोपस्थापकतावच्छेदकावच्छिन्नविशेष्यतानिरूपकबोधजन
कतावच्छेदकस्वावच्छिन्नविषयताकानुपूर्वीमत्त्वमिति धर्मघटनया लक्षणपरिष्करणस्यावश्यकतया कर्मधारयसमानानुपूर्वीके
ग्राह्ये तत्पुरुषादौ चातिव्याप्तिरिष्टैव तादृशबोधप्रयोजकताविशिष्टानुपूर्वीविशेषणेऽपि तत्पुरुषादौ संबंधिलक्षणायामनुद्धा
रात् यदपि स्वावच्छिन्नवृत्त्यवच्छेदकावच्छिन्नप्रतिसंधानजन्योपस्थितिविषयत्वं तादृशोपस्थाप्यत्वं तज्जोपस्थितेः समा
सप्रयुक्तलक्षणाप्रतिसंधानाधीनेलक्षणाप्रतिसंधानाधीनत्वपर्यवसितं निवेशनीयं तत्पुरुषादौ पूर्वपदादेः समासप्रयुक्त
लक्षणयैवार्थोपस्थापकतया नातिप्रसंगः नीलोत्पलादिघटकनीलादिपदानां तु लक्षणा न समासप्रयुक्तेति नातिप्र
संग इति तदपि स्वत्वानानुरंजनमात्रं समासविशिष्टत्वज्ञानं विनापि शाब्दबोधोदयेनान्यथासिद्धतया समासविशिष्टत्वज्ञानस्य
प्रयोजकताविरहेणातिप्रसंगानुद्धारात् बहुव्रीहौ चित्रगवादिपदार्थानामभेदान्वयितां विनापि लक्षणानुपस्थाप्यतया
निप्रसंगात् विशेष्यतायां लेसुत्यविशेष्यतां निवेश्य तद्धारणासंभवेऽपि समानानुपूर्वीकतत्पुरुषादावतिप्रसंगस्यानुद्धा
रात् किंच तत्पुरुषव्याघ्रादौ मासाहसपावच्छिन्नलाक्षणिकपदघटितकर्मधारयेऽव्याप्तिः लक्षणीयलक्षणाप्रतिसंधान
समासनिबंधनत्वात् संकेतविशेषसंसर्गेण कर्मधारयशब्दवत्त्वं कर्मधारयत्वमित्यत्र च वदंति तत्र नः अभेदसंसर्गावच्छिन्नप्रकारतानि
रूपितविशेष्यतानिरूपकबोधजनकतावच्छेदकस्वावच्छिन्नविषयताप्रयत्नप्रकारतानिरूपितानुशासनाधीनबोधविषयताश्र

च्छेदकतापर्याप्त्यनुयोगितावच्छेदके नीलत्वजातिविशिष्टविषयकधीविशेषेऽव्याप्तेर्निरुक्तावच्छिन्नप्रतियोगिता
काभाववद्वृत्तिसंबंधसत्वात् तादृशधीविशेषावच्छिन्नावच्छेदकतापर्याप्त्यनुयोगिताकनीलावच्छिन्नप्रकारतापा
लक्षणावच्छेदकतादृशाभिप्राय इव यत्र स्वावच्छेदकैककार्यविशेष्यकाभेदसंबंधावच्छिन्नतादृशपदार्थप्रकारताकबोध
जनकक्रमिकतामद्दृप्तेकर्मेपारयतं नीलमुत्पलमित्यादिवाक्यवारणाय क्रमिकत्वनिवेशने नास्तोऽभिमतिश्च।
वाहितत्वेन क्रमिकत्वविरहान्नातिप्रसंगः नन्वहृष्यादिवारणायाभेदसंबंधावच्छिन्नत्वं प्रकारताविशेषणं तत्र
हृष्यादेः पूर्वपदार्थे संबंधपलक्षणान्तर्गतसंबंधिलक्षणस्य मास विग्रहवाक्ये तुल्यार्थकत्वानुपपत्तेः संबंधस्यान्तरपदार्थ्या।
दौ भेदान्वयः शक्तिपदिकार्थयोर्भेदेन साक्षाद्द्वयोः तुल्यत्वं निपुणतोसमासोच्छेदकत्वेन प्रातिपदिकविशेषणान्न।
तद्विरोधः निमित्तकारकताश्रयणान्नातिप्रसंगः तन्वरूहपोपमित्यादितद्ध्वं तावच्छिन्नेः भेदसंसर्गाणपुरुषादिप्रकार
कबोधोदयात्प्रतिजनकतामादायातिप्रसंगाभावाच्छेदकत्वनिवेशः इदमादेः एतमाह वदि पूर्वं तस्य च्छेदकत्वविरहा
न्नातिप्रसंगः यद्यप्येवं नीलमित्यादिवाक्यातिव्याप्तिर्दुर्वारा नीलाद्यभेदान्वयबोधकत्वस्य विभक्त्यव्यवहितत्वे
न क्रमिकतामद्दृप्तत्वस्य सत्वात् न च पूर्वपदार्थप्रकारकत्वस्यान्तरपदार्थविशेष्यकत्वस्य वा निवेशने न वारणीयोपदे
ष्टृ इति वाच्यं विशेष्यविशेषणभावयोर्विवक्षाधीनत्वेनाप्युत्तरपदार्थस्य विशेष्यतासंभवात् जातिशाहृस्य विशेष्यस।
मर्थकतानियमेमाताभावात् भावे घिमहःफलमित्यादावतिप्रसंगस्य दुरुद्धरत्वात् इति शाकटायनेन तथापि क्रमिकत्व।
स्याव्यवधानेन प्रतिसंधीयमानतात्मकस्य निवेशनीयतया न दोषः दर्शितवाक्यघटकप्रतिसंधानयोर्विभक्तिप्रतिसंधान
व्यवहितत्वेनानन्याभावात् समासे विभक्तिप्रतिसंधानत्वे लापाभावेनाभावात्तेनातिप्रसंगविरहादिति केचिदवधेयं विहितं।

नसु
प्रभा
मु
१५९

तेईवीरत्वादिनिवार्यं विशिष्टानुपूर्व्याः प्रत्येकपरिसमाप्तधर्मावच्छेदेनाभावप्रत्येनाव्याप्तिरिति तादृशाप्रसिद्धाभावावच्छेद
कावच्छेदेन ज्ञानस्य भ्रमत्वात् प्रामाण्यस्यापादयितुमशक्यत्वात् नीलोत्पलादावानुपूर्व्यवच्छिन्नेपदजनकतावच्छेदकता
दिव्यतित्वादृशविशिष्टानुपूर्वीमत्वज्ञानस्य प्रमात्वात् एवमन्यवच्छिन्नपूर्वत्वसंबंधेनोत्तरोत्तरवर्णविशिष्टपूर्वपूर्ववर्णत्वादिरू
पानुपूर्वीमत्त्वपि तादृशविशिष्टानुपूर्वीज्ञानं प्रमादिनिगमनाविरहेण सर्वासां संभवदानुपूर्वीणां तथाभावसंभवात् यदि
तु प्रत्येकपरिसमाप्तधर्मावच्छेदेन विशिष्टानुपूर्व्या अभावो न प्रामाणिकः मतीते विशिष्टानुपूर्व्याः प्रत्येकपरिसमाप्तधर्मा
नवच्छेद्यत्वाद्यवगाहित्वस्य तु पपत्तेरिति विभाव्यते तदा प्रत्येकपरिसमाप्तधर्मगतधीविशेषणे विशिष्टानुपूर्व्यवच्छेदक
ता पर्याप्त्यनुयोगितावच्छेदकतायाः पारतंत्र्येण विषयीकरणात् तद्दोषो भ्रमत्वं तादृशशाब्दबोधादेरनिवार्यमवधेयं अथै
वं पंचकपालादौ हित्वादिनिष्ठमित्त्वस्यापि समानाधिकरणापेक्षणीयत्वेनाभेदसंसर्गेणैकपदार्थः परपदार्थप्रका
रकबोधजनकतया तु शाब्दबोधितत्वात् तत्राभेदसंबंधावच्छिन्नप्रकारतानिरूपितमुख्यविशेष्यतानिरूपकबो
धजनकता निवेशनीया हित्वजन्यबोधीयाभेदसंसर्गावच्छिन्नपंचत्वप्रकारतानिरूपिता कपालादिवृत्तिविशेष्यता
नमुख्यविशेष्यतासंकलितादिन हित्वार्थो यो द्व्येककपालादिः प्रकारत्वात् तद्वित्वार्थो वृत्तिविषयतायाः मुख्यविशेष्यतात्वेपि
तादात्म्यसंबंधावच्छिन्नप्रकारतानिरूपितत्वविरहात् अवलंबनमेव कत्वात् हित्वार्थसंस्कारादौ कपालादेरधिकरणत्वे
वान्वयात् कपालादिपदानां कपालाधिकरणकादिलाक्षणिकत्वेपि तदीयप्रकारतायाः अभेदसंसर्गावच्छिन्नत्वेपि वतनि
रूपिता संस्कारादौ विशेष्यता न मुख्यविशेष्यताकर्मत्वाद्यंशे संस्कारादेः प्रकारत्वादतीतातिप्रसंग इति वाच्यं तथापि ।
तिपूर्वेषां मालायां भवः पौवैशालराक्षादिकमेभ्यो आमेहनज्ञाप्यभेदसंसर्गावच्छिन्नप्रकारतानिरूपितमुख्यविशेष्य

यत्प्रकारतानिरूपितानुशासनाधीनबोधविषयताश्रयवृत्तित्वविशिष्टानुपूर्वीमत्त्वं कर्मधारयत्वं समासनाधि
करणाधिकारीयसमासस्य कर्मधारयत्वाभेदसंसर्गेण कपदार्थैः परपदार्थान्वयबोधजनकत्वे तादृशजनकताव
च्छेदकविषयताश्रयत्वपर्यवसिते ऽनुशासनेन बोधिते नीलोत्पलाद्यानुपूर्व्यवच्छिन्नविषयतायास्तादृशजनकता
वच्छेदकत्वं बोधितं भवति तादृशविषयताश्रयत्वप्रकारतानिरूपितानुशासनजन्यबोधविषयता तादृशवाक्यवृत्ति
२५ रिति तदाश्रयवृत्तित्ववैशिष्ट्यस्य तादृशानुपूर्व्यां सत्त्वाल्लक्षणसमन्वयः । न चैवमनुशासनताधीनबोधीयतादृशज
नकतावच्छेदकत्वप्रकारतानिरूपितविशेष्यताश्रयत्वावच्छिन्नविषयताकानुपूर्वीमत्त्वमेवास्तु लक्षणं नीलोत्प
लानुपूर्व्यवच्छिन्नविषयतायास्तादृशजनकतावच्छेदकत्वेनानुशासनबोधविषयतया लक्षणसमन्वयादिति वा
च्यं कर्मधारयसमानानुपूर्वीके तत्पुरुषादावतिकामीदृशनिवेशे तन्नातिप्रसङ्गः तादृशानुपूर्व्यवच्छिन्नविषयता
श्रयत्वप्रकारतानिरूपितानुशासनजन्यबोधविषयतायाः कर्मधारयमात्रवाक्यवृत्तित्वेन तदाश्रयवृत्तित्वविशिष्ट
तादृशानुपूर्वीमत्त्वविरहात् तत्पुरुषादीनामभेदसंसर्गावच्छिन्नविषयताकबोधजनकत्वापि तादृशानुपूर्व्यामनुशा
सनाबोधितत्वात् एवमिस्मायधीभावे पि नातिप्रसङ्गः । न च तादृशजनकतावच्छेदकविषयताश्रयत्वमेवास्त्व
लं गुरुतरेणानुशासनतादृशविषयताश्रयत्वान् भ्रमविषयतासत्त्वेपि प्रमानिवेशेन वारणीयत्वादन्यथा तदनु
नुशासनजन्यत्वोपवनतपुरुषीयभ्रमस्य विषयतामादायातिप्रसङ्गस्यानुद्धारादिति वाच्यं तदनुशासने तादृशविषय
तायाः प्रत्येकपरिसमाप्ततया प्रत्येकं वर्णेषु कर्मधारयत्वव्यवहारापत्तेः न चाद्यद्वयोः पदत्वाद्विसमानः
पूर्वपूर्ववर्णविशिष्टचरमवर्णतात्पर्यकानुपूर्वीसमकालीनविशिष्टसमानेन चरमवर्णमवतः कर्मधारयत्वस्य प्रत्यक्ष

मञ्जूष भा पू॰ १६०

मेवोपाधेयसंकरेणोपाधेरसंकरेणादोषात् अतएव द्विगुर्विधौ कर्मधारयः इति संख्यापूर्वो द्विगुरिति सूत्रे । तत्पुरुषः समानाधि
करणः कर्मधारय इति पारिभाषिकतत्तत्संज्ञावान् अनावश्यकत्वादिति कर्मधारयत्वाद् द्विगुसंज्ञाग्रहः द्विगुनिमित्तकपरसंस्कार
प्रवृत्तिप्रयोजनकत्वाच्च संज्ञान्तरं नाप्रयोजनकं एतेनोपदर्शित सामान्यादेरनुशासनाधीनबोधविषयकोद्भावुपलक्षण
तया निवेशोऽनन्यह्रस्वादावतिप्रसंगानुद्धारः तत्रापि बोधजनकतायाम् अनुशासनबोधितत्वसत्वात् स्वीनबोधस्यापि विवक्षि
तोऽभेदसंसर्गावच्छिन्नप्रकारतानिरूपितमुख्यविशेष्यतानिरूपकत्वात् विशेषणाविषयतानिवेशेन तत्राऽशावि शे
षविशिष्टबोधजनकत्वप्रयुक्तानुशासनबोधितत्वाभावेनातिप्रसंगाभावः समभिव्याहृतसमानाधिकरणशब्दोदितविधेयाख्या
दिविशेषणत्वमिति विशिष्टबोधजनकतादिबोधानुत्पादादसंभवो दुर्वारः विधेयतादृशबोधाजनकत्वे दर्शिततत्तद्विधि
वाक्यसमानाधिकरणशब्दप्रतिपादितादृशार्थकतायाः प्रयोक्तृतात्पर्येण तद्बोधितत्वघटकत्वात् समानाधिकरणपद
वदिति विधिबोधितत्वस्यैव तन्त्रत्वे तत्र तस्य आदित्यादिकं समासादितं द्विगुसाधारणस्यादोषत्वमापद्येत तस्मान्निवेशनतया
तदितरांशस्य विशेषणतया निवेशनासंभवादतिप्रसंगाभावो नावकाशात् विशेष्यविशेषणभावाद्यवच्छेदकयोः स्वनियम्या
६ धारय भावः कर्मनियामकः विशेषणं विशेष्येण बहुलमिति वाक्यनिर्दिष्टसमस्तोपादानेन तस्यैव पादस्वलाभसंभवादुभयोप
दानेन प्रसाधितः तेन गुणवदद्व्यंगपवत् पृथिवीत्यादीनां न साधुत्वं विशेष्यविशेषणभावावच्छेदकयोः परस्परव्य
भिचारः कर्मधारयनियामक इति तु न युक्तं नीलोत्पलादौ तदभावेन तत्र साधुतापत्तेः अतएव नीलसपदार्थतावच्छेद
कसत्त्वे नित्यत्वादिमत्त्वस्य पुरुषत्वाव्यभिचारितत्वेपि पुरुषोत्तम इति कर्मधारयः साधुः नन्वपुरुषाणामु
त्तमः इति षष्ठीसमासेनापि तन्निर्वाहः सुकरः इति वाच्यं निर्धारणषष्ठ्याः समासनिषेधात् नन्वपुरुषेषूत्तम इति सप्तमीस
मासेन गतिनिर्धारणसप्तमीसमासेन तादृशप्रयोगस्य साधुत्वसंपादने निर्धारणषष्ठीसमासनिषेधवैयर्थ्यप्रसङ्गादिति चे

कर्म्मत्वाद्यंशे संसर्गादेः प्रकारत्वात् तो नातिप्रसंगः इति वाच्यं तथा सति पूर्वं स्थाल्यां भवः पौर्वस्थालः इत्यादिक
र्म्मधारयाव्याप्तेः तत्र अभेदसंसर्गावच्छिन्नप्रकारतानिरूपितमुख्यविशेष्यतानिरूपकत्वा तज्जनकत्वानुशासनबो
धितत्वासत्वात् तद्धीनबोधस्य स्थालीपदलक्ष्यतावच्छेदकस्थालीयत्वावच्छिन्नप्रकारतानिरूपितायाः मुख्यवि
शेष्यतायाः सत्वेऽपि विरहात् तद्विषयभवनक्रियायाः कर्तृत्वांशे प्रकारतयापि भानात् नच तत्र पूर्वस्थाले भवे समासस
हितार्थे विषयभूते नहि धानात् कृतसमासात् दिक्पूर्वपदसमाससत्तानिबंधनतद्धितोत्पत्तिः हितार्थो न वर्गादितोऽभेदसं
सर्गावच्छिन्नस्यैव पदार्थप्रकारतानिरूपितोत्तरपदार्थमुख्यविशेष्यतानिरूपकबोधस्य जनकत्वमनुशासनबोधितत्वा
न्नाव्याप्तिरिति वाच्यं तथा सति पंचसु कपालेषु संस्कृतः पंचकपालस्तस्य हविष्ट्वे विहितो तद्धितार्थो न वर्गादितं समासजन्ता
दृशबोधमादायातिप्रसंगस्य दुर्वारत्वात् तस्मात् तद्धितार्थे प्रसंगो स्मृत्यो वादर्शितकर्म्मधारयः तत्पुरुषत्वात्पाशाव
न्तुः नचात्र हितार्थे विषये इति विवरणे समासत्वनिबंधनमासोपरि कत्वसंपादनेन तद्धितोत्पादनार्थमितिपदसंस्कारोप
योग्ये च ननु बोधे तद्धितार्थाभानविधानार्थेन तद्धितार्थमुख्यविशेष्यकबोधजनकतायामेव तत्र तु शासनतात्पर्यं लक्षणोत्त
मुख्यविशेष्यतानैव निवेशनीयेति नातिप्रसंगः तिप्रसंगस्तु संख्यावच्छिन्नत्वेनाभेदसंसर्गावच्छिन्नप्रकारता विशिष्टवार
२ णीयत्वमभिधातुं शक्यं समर्थपदस्यादिकर्म्मधारयाव्याप्तेः पूर्वपदार्थस्य संख्यावच्छिन्नस्यैव प्रकारत्वादिति चेद्योग्य
ते संख्यावच्छिन्नप्रकारतानिरूपिताया विशेष्यताया तदात्मिकाया तदवच्छिन्नाया या प्रकारता तद्भिन्नत्वं तदनवच्छिन्नत्वं वा मुख्य
त्वमित्यनिवेशनीयं तथा च समर्थपदोनाव्याप्तिः समासमात्राधीनबोधे उत्तरपदार्थस्य प्रकारतया भानात् नापि पौर्वस्था
लाद्यव्याप्तिः उत्तरपदार्थस्य प्रकारत्वेऽपि संख्यावच्छिन्नांशे विशेष्यतया भानात् पंचकपालादिद्विगुजबोधे तु संख्यावच्छि
न्नांशे विशेष्यता पंचसु विनोत्तरपदार्थस्य तद्धितार्थप्रकारतया भानान्नातिप्रसंग इति अथवा द्विगुभिन्नलुक्कर्म्मधारयत्वव्याप्त

क

सद्य
प्रमा
पृ०
९६१

यमोऽव्यभिचारीति शंकां समस्तेनानधिकरणादिना पदादेः समासस्यैव तत्तत्संगीकारात् पंचगवधनः इत्यादिस्तु बहुव्रीहि
रेव बहुनामग्रभे हि गुरुत्वगवां तेन समुच्चयेऽवेतिनच्चा विद्भवपत्तिरिति द्विगोर्लक्षणंतु न संख्यावच्छिन्नबोधपूर्वपद
कसमासत्वं पंचप्ररूपादिकर्मधारयादावव्याप्तेः नापि संख्यावच्छिन्नबोधपूर्वपदकत्वेनानुशासनबोधितत्वं संख्यापूर्वो
द्विगुरित्यनुशासनेन तस्याबोधितत्वाद्वा प्रसंगः संख्यापदस्य रीतिविधिविरहाद्वनर्दशिनातिप्रसंगाभावतिसंभवति त्रिमुनीत्या
द्यव्ययीभावे द्विग्राइत्यादिबहुव्रीहौ समर्थपंइत्यादिकर्मधारये चातिप्रसंगात् तेषां संख्यापूर्वत्वविधिविरहाद्वनर्दशिनातिप्रसंग
इति संभवति त्रिमुनीत्याद्यव्ययीभावे द्विग्राइत्यादिबहुव्रीहौ समर्थपंइत्यादिकर्मधारये चातिप्रसंगात् तेषां संख्यापूर्वत्ववि
तविधिकत्वात् अभेदसंसर्गावच्छिन्नपूर्वपदार्थविषयताघटनघानया विध निवेशनस्यापि तत्र निरूढे समर्थपंइत्यादौ
ताद्रशबोधजनकतयानुशासने बोधितत्वसत्वेनातिप्रसंगानुद्वारात् किंतु संख्यावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारता
निरूपितप्रकारतावच्छिन्नविशेष्यतानिरूपकबोधजनकतावच्छेदकत्वावच्छिन्नविषयताश्रयप्रकारतानिरूपितानु
शासनाधीनबोधविषयताश्रयत्वमिति त्वं विशिष्टानुपूर्वीमत्वं समानाधिकरणाधिकारीयत्वादभेदसंसर्गावच्छिन्नप्रका
रतातद्धितार्थादेर्वेद्विशेष्यस्यनिर्देशेनचप्रकारतावच्छिन्नविशेष्यतानुशासनालभ्यतइतिनातिप्रसंगः अतएवसमा
गमित्याद्यव्ययीभावेऽतिव्याप्तिः समस्तावच्छिन्नपूर्वपदार्थीयाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितमुख्यार्थविशेष्यता
निरूपकबोधजनकत्वात् उत्तरपदार्थसंख्यादेः समाहारांशे विशेषणतया मुख्यविशेष्यताविरहादिति निरुक्तसामानाधि
करणाधिकारीयताविरहेणाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितमुख्यविशेष्यताबोधजनकतयानुशासनाबोधितत्वेनातिप्रसंग
विरहात् त्रिमुनिसमर्पिप्रमतीनामभेदसंसर्गावच्छिन्नप्रकारतातन्निरूपितप्रकारतावच्छिन्नविशेष्यतात्मभावेणानु

चित् अत्रे तु निर्द्धारणसप्तमीसमासप्रसक्तावपि पुरुषोत्तमः इति नेत्थाकरीत्या निषेधवैयर्थ्यं सप्तमीसमासनिषेधस्यापि बोधय
तीति वाच्यं स्वरवैलक्षण्येन निषेधस्य सफलत्वात् न च स्वरस्य वेदे एवोपयोगात् वैदिकप्रयोगाणां च सिद्धत्वात् सदा तन्नस
धुत्वाद्यनन्तरं निषेधोपयोगः इति वाच्यं स्वरविशेषार्थं विशेषश्रुति संधानेनोपयोगस्य वैदिकेऽपि निर्विवादत्वादि
त्याहुः केचित् विशेष्यतावच्छेदके विशेषणतावच्छेदकव्यभिचारः कर्मधारयनियामकः पुरुषोत्तमः इत्यत्रोत्तमत्वम
मनुष्यत्वं विशेष्यतावच्छेदकं विशेषणतावच्छेदकस्यात्मकत्वात्मकस्य पुरुषत्वस्य घटादौ व्यभिचारित्वमस्त्येवेति न दोषः
तावता पुरुषत्वेपि नाटशोत्तमत्वव्यभिचारित्वं जीवेषु सकलमस्मितिमव स्तुतमपुरुषत्वं इत्यपि साधु रितिमेऽस्मिन्मतं अत्र
पक्षे मनुष्यादिकर्मधारयाणामसाधुतापत्तेः विशेष्यतावच्छेदके पुरुषत्वे प्रमेयत्वव्यभिचाराभावात् न च नरस्य शरीरेण
द्वेः शिरः इत्यादावित्याभेदात्मकसंबन्धावच्छिन्नषष्ठीसमाससमाधाने प्रकृते तथा सति शब्दपदस्य स्वार्थसंबन्धिलक्षकत्वेन प्रमेय
संबन्धाभिन्नो पुरुषः इति बोधापत्तेः प्रमेयाभिन्नो पुरुषः इति बोधानापत्तेः तस्मात् समनियमाभावो नियामकः इत्येव सारं न च त
त्रापि मानुषब्राह्मणः इत्यादिप्रयुक्तापत्तिः दोषः इति वाच्यं तत्र मनुष्यतायाः इष्टत्वादन्यथा न वापि ब्राह्मणमात्रस्य इत्यादीनां साधु
तापत्तेरेव सम्प्रमाणत्वात् पुरुषोत्तमः इत्यत्रापि तादृशकर्मधारय पञ्चमीसमासः संबन्धार्थकषष्ठीसमासश्च भवतीति बो
ध्यं सुप्सुपेत्येकार्थस्य विवक्षितत्वात् यथा इदं बहुव्रीहौ तत्पुरुषसमासानां न बहूनामपेक्षितत्वं प्रामाणिकं तेन नीलं पीतं वो
स्तु इति विग्रहे एकवस्त्रत्वमिति नीलत्वपीतत्वावच्छिन्नो नीलपीतोभयप्रकारकबोधः समाधानो नीलपीतोऽस्तु इत्यादिकः
कर्मधारयो न साधुः अनेकमन्यपदार्थे इत्यनेकग्रहणसंग्रहोपि पाठस्य तत्पुरुषादौ बहुव्रीहिग्रहणबहूनामपेक्षितत्वमिति प्रामाणि। (
काः न च पदानधिकरणत्वं प्रति निषेधो निरूपितावच्छेदकभिन्नादि निषेधस्य पदार्थप्रधानतत्पुरुषाणामपि बहूनामपेक्षितत्वादिति

महा
प्रभा
षु-
१६२

तनस्तुल्यं मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधा
दिति शिक्षया स्वररहितस्य नरकहेतुत्वनाशौ प्रतिपादकत्वप्रतिपादनेन स्वरस्याव्ययोगिता यावत्कर्मण्यावश्यकत्वात्
लौकिकवाक्येऽपि स्वरप्रयोगिता यावज्जनपदव्यवहारैः इष्टेनेष्टस्यामित्रावैकारितेरेस्मद्गुरित्यद्दःस्तनःस्थमियुक्तो ह्ले
हृदस्यावेदकत्वात् वेदविहितत्वात् तस्यापि फलजनकत्वमिष्यत इति न । किंच लौकिके स्वराप्रयोगे स्वरविशिष्ट
तत्तदर्थाभावाच्छेदकीभूतादिकं प्रागेव निष्प्रयोजनमनर्थकं स्यात् । एवं सति भ्रमभिन्नत्वनिवेशप्रायेण निरुक्तवै
शिष्ट्यं शोरवेण निवेशापितन्मन्तुचितमेवेति चेन्न । पंचकपाले हिवी समभीतनेस्प्रहृषे बहुव्रीहौ च पूर्वपदप्रकृतिस्व
रस्य साम्येन बहुव्रीहित्वरूपधोरतिप्रसक्तिविभक्तयेनिरुक्तवैशिष्ट्यं लिङ्गे सत्वावश्यकत्वात् । वस्तुतस्तु स्वरविष
यतान सापेक्षत्वानीयजनकतावच्छेदककोटौ निवेशात् स्वरविरहे तदर्थावगमस्यानवगमेन बोधनेत्त स्वरविशेष
ज्ञानस्यार्थविशेषेतात्पर्यावधारणकारणतयापि स्वरूपपदस्य तेऽप्यपमेवैतद्दूरीकर्तव्यं कथमन्यथा प्रकारान्तरे
णावगतताम्पर्यकस्य स्वरविशेषमजानतोऽपि लौकिकादेर्विकाद्वा शब्दादर्थावगमः । इत्थं च समानानुपूर्वीकस
मासोत्तरे तादृशजनकतावच्छेदकविषयतानिरूपत्वदेवेति तदन्यातिप्रसक्तिविमुक्तये निरुक्तवैशिष्ट्यनिवेशन
मावश्यकमेवेति सारं । केचित्तु स्वाच्छिन्नबोधकपदज्ञानेनरत्वविशिष्टं यज्ज्ञानं स्वार्थविशेष्यकतादात्म्यसं
बन्धावच्छिन्नतामलस्यान्यतत्त्वाभावार्थप्रकारकबोधजनकं तत्तज्ज्ञानत्वं तापवं तज्ज्ञानमतज्ज्ञानमलस्यान्यतज्ज्ञानार्थ
भिन्नस्वार्थीहिगुः पंचकपालइत्यादिनः स्वाच्छिन्नबोधकपदात्मकतामोनरत्वविशिष्टस्य कपालपदस्यार्थे
कपालेपूर्वपदालम्बस्यपूर्वपदार्थं पंचत्वसंख्यावच्छिन्नस्य तादात्म्यसंबंधेनान्वयबोधोदयात् पंचपदोत्तरतापत्

शासनाधीनबोधविषयताभावान्नातिप्रसंगः द्विगुसमासानुपूर्वीके पंचकपालादिके अधात्यादावतिप्रसंगाभंगा
यत्तादृशजनकतावच्छेदकत्वावच्छिन्नविषयताकत्वमुपेत्य तादृशविषयताश्रयत्वप्रकारतानिरूपितानुशासना
धीनबोधविषयताश्रयत्वमिति तत्रैव विशेषणानुपूर्वी विशेषिता न च तादृशानुपूर्व्यवच्छिन्नविषयतात्वेन तादृशजनक
तावच्छेदकत्वस्य द्विगोरेव विषयतायां सत्त्वान्नातिप्रसंग इति तादृशजनकतावच्छेदकत्वावच्छिन्नविषयताश्रयत्व
मित्यत्रैव विशेषणमेव निवेश्यतामिति तदंशे निवेशो निरर्थकः इति वाच्यं समासानुपूर्वीके समभिव्याहृतादृशानुपूर्व्यव
यादि च्छिन्नविषयतात्वेन तादृशजनकतावच्छेदकत्वानपायादतिप्रसंगात्सत्त्वात् न तद्विगुहत्तित्वम् पिलादृशानुपूर्व्यव
च्छिन्नविषयताविशेषणतामापद्यमाने तादृशजनकतावच्छेदकमिति वक्तव्यं तथा सति तादृशानुपूर्वीप्रकारेणैव ५८
त्वं तत्पदस्याद्विगोस्तान्नस्य जनकतानुपपत्तेः यदि च समासान्तरीयस्य तथात्वाद्विगोस्तानादृशबोधानुत्पत्ते द्विगोरेव
त्वावगाहिनस्तादृशबोधे तत्त्वात्सर्वविशेषणावच्छिन्नविषयताजनकतावच्छेदिकानेन तत्साधारण्येऽप्युच्यते तदा विस
र्गस्य विसमासांतरेऽपि समभिव्याहृतानिप्रसंगो दुरुद्धरएव समभिव्याहृतनिरूपितत्वेन विषयताविशेषणतेन नतावत्समस्तपदक
नां पूर्वप्रति ५ विशेषणानां सर्वसद्वृत्तितौ पादितरीत्यानिवेशनीयतयागौरवात् सगुरुसलौकिकवाक्येन प्रयोगाप्त्वैदिकवाक्ये
स्वीयप्रयोगितासत्ते विधायकपवतत्तत्त्वासत्वात्फलेविशेषेनानुशासद्वोधजनकतावच्छेदकं तदवच्छिन्नविषय
ताविदये इति मानाभावादित्यपर्शितेन विचारो यापसदृशानानुसंधानमेव यतेनानुशासनाधीनबोधजनकबोधप्रम
मादाय निरुक्तवैशिष्ट्यनिवेशेऽप्यतिप्रसंगानुद्धारात् समभिव्याहृतमनुशासननवाधेनस्यानिवेश्यापितितन्निवेशनिवेध
नेगौरवं नातिरिच्यत इति उक्तिरपिप्रकृताभिरुक्तवैशिष्ट्यानुकौसमभिव्याहृतनिवेशपापत्तरीत्या निलाश्विरहाधि

महा
प्रभा
धु॰
१६३

वेनशक्यार्थस्यैवप्रकारत्वयाः आमितिविरहात् नवसमर्थपः स्यादिवाक्येष्वतिव्याप्तिः पूर्वपदशक्यार्थस्यैवसमत्वावच्छि
न्नस्योत्तरपदार्थप्रकारत्वयानन्वयीतबोधेमानादितिवाच्यं पञ्चानामाम्रवद्धितोत्तरत्वेनानुसंधीयमानत्वात्मकसमन्ना
म्नोत्तरत्वस्यनिवेशयत्वात् विभक्तिप्रतिसंधानेनपूर्वोत्तरपदप्रतिसंधानयोर्व्यवधानादतिप्रसंगाविरहादितिवदंतित
न्नं पंचाम्रशक्यार्थसाभाववच्छिन्नप्रकारकत्वार्थविशेष्यकान्वयबोधसमर्थत्वनामावद्धितेनामतन्नामशक्या
र्थाभिन्नत्वार्थोद्विगुरितितेनावनवभवदभिमतत्वस्यनिवोद्वृद्धिविशिष्टमंत्रस्योत्तरत्वस्यतादात्म्यसंबंधावच्छिन्नत्वस्यवंधेन
र्थ्येन नचतावतोपिसंभवतिद्विगुलक्षणत्वंत्रिमुनिपंचनद्याद्यव्ययीभावातिप्रसंगात् नवपंचनदमित्यत्रनातिप्रसं
गोनदीभिश्चव्ययीभावस्यैकनद्यायातिप्रसंगाभंगापत्तेःसमाहारेविधानादुत्तरपदस्यनदीसमाहारलाक्षणिकत्वेपासम
हारेचनदर्थपूर्वपदार्थस्याभेदेनान्वयादितिवाच्यं नदीसमाहारस्योत्तरपदार्थत्वेतदेकदेशस्यनयाअपितदर्थत्वा
नपायात् नदिमुख्यविशेष्यतयासोपस्थाप्यत्वस्यार्थत्वमिद्धंनिवेशयितुंशक्यंसमाहारद्विगोतद्धितार्थद्विगोके
नरपदस्यलाक्षणिकत्वापत्तेःव्यामेहृत्तरपदार्थैकदेशशान्तत्वादौपूर्वपदार्थान्वयस्यसमाहृतत्वेनसमभ्यातीत्यादेरेव
घाव्यापेक्ष एतेनबहुव्रीहाविवेकदेशान्वयानुपपत्तेस्तमुदायेएकपदलक्षणामाश्रावपृथक्त्वान्नपंचनदाद
वुत्तरपदार्थैकदेशपदार्थान्वयरूपयोरेकपदार्थत्वादिस्तुतिरपिप्रत्युक्ता तल्लभुत्वात्समाहारद्विगोतद्धितार्थद्विगोश्चै
कपदलक्षणयाः समुदितार्थस्मादरणीयत्वयात्तशक्यातिभयेनन्यन्नामप्रतिसंधानाधीनोपस्थितिप्रयोज्यप्रकार
तावच्छेदेनलक्षणस्यनिवेशक्यमशक्यत्वया पूर्वपदशक्यतायाःसुनिवेशितायाउत्तरपदार्थैकदेशत्वेपिपंचत्वाद्यवच्छि
न्नेःनपायेनपंचनद्यायतिप्रसंगास्पृष्टत्वात् समभ्यातीत्यादावव्याप्तिभयेनदर्शितनमुख्यविशेष्यतावदितिस्वार्थ

कपालपदे लक्षणासमन्वयः नीलोत्पलादिकर्मधारयवारणाय विशिष्टमन्ते यन्नामलक्ष्यान्वयनिवेशनाद्विवक्षि
भुवनचतुष्टयगतवर्गपंचगणमप्यवास्तव षट्सु षट्पदार्थसमर्थिषुग्रहनागमृष्टवस्तुं नवग्रहशभूतैकादशरुद्रैकादशं
दिपदार्दशाखिलादिकर्मधारयेष्वनतिप्रसंगः आदिपूर्वपदानां कृत्वादिपदार्थमभित्त्वावच्छिन्नेलाक्षणिकतया
तदीयार्थस्योत्तरपदार्थतादात्म्येनाप्रकारत्वात् नवत्रित्वावच्छिन्नानामभेदसंसर्गेणोत्तरपदार्थप्रकारतया
बोधनेन कृतकृत्यतया नवलक्षणानावश्यकीतिवाच्यं त्रिकद्वयमतिप्रसंगः सामान्यतः कट्वादिपदार्थबोधेन संख्या
दित्रिकस्य बोधे नवत्वस्य बाधायाश्चावश्यकत्वात् नचैवं दशमूल्यादिद्विगावव्याप्तिस्तत्रापि मूलविशेषणबोधनायल
क्षणायाश्चावश्यकतादिति वाच्यं विशेषे तात्पर्यबलादेव सामान्यरूपेण विशेषबोधनसंभवेन तत्र लक्षणानाग्रहात्
नचैकपदादिकर्मधारयेऽतिव्याप्तिः पूर्वपदालक्ष्यस्यैकत्वस्य कस्याभावावच्छिन्नपूर्वपदार्थस्योत्तरपदार्थतादात्म्ये
नप्रकारतया भानादितिवाच्यं संख्यावच्छिन्नस्य पर्याप्तिसंबंधेनावच्छिन्नत्वनिवेशादेकत्वस्य च समवायेन नितो
द्वान्तानाभावेन पर्याप्तिसंबंधेन भानानुपगमेनातिप्रसंगविरहात् एवमपि द्वित्वघटादिकर्मधारयाव्याप्तिः प
र्याप्त्या द्वित्वावच्छिन्नस्यैव पूर्वपदार्थस्याभेदसंबंधेनोत्तरपदार्थप्रकारतया भानादेकस्मिन् द्वाविति प्रयोगप्रामा
ण्यापत्तिवारणाय तत्र पर्याप्तिभानस्यावश्यकरूपेणव्यादित्यपि न शंक्यं लक्ष्यत्वाभमत्वं परित्यज्य तन्नामसंख्याप्रवेशस्य
निवेशनीयत्वात् द्वित्वादेरद्वित्वान्तस्यावान्तरधर्मशक्तिविरहेणातिप्रसंगाभावात् अथ सप्तर्षयः शतीत्यादावव्याप्ति
रुत्तरपदार्थे पूर्वपदार्थे संख्यात्वावच्छिन्नसामान्यसंभवात् सप्तपदलक्ष्यार्थसप्तगुणितत्वेनतयाविधानवयोग
गमेऽपि कथं तदन्वयेन निरुक्तलक्षणाप्रवेशादिति चेन्न पूर्वपदार्थैकदेशे शतत्वे सप्तत्वावच्छिन्नस्याभेदान्वयसंभ

115

महा
प्रभा.
पु.
१५८

तथा तद्धितार्थस्याप्रसिद्धेरेव समभ्युदायात् अपि च यतत्वाद्यर्थस्यैकैकव्यक्तिविश्रान्ततया बाह्यस्य समुदायात्मकता
योगादानामसंभवात्संभवः तत्र तत्पदानुपूर्वीनिवेशावच्छेदकत्वेन लक्षणानिर्वचनेन पंचस्वेव समासेषु निमग्नं
गः अव्ययीभावे तस्योक्तत्वात् पंचकपालादेस्तद्धितार्थविषयकस्य विशेषणसमासकर्मधारयस्य पंचकपा
लादिद्विगुसमानानुपूर्वीकपदरूपकत्वात् तथा पंचानां कपालः पंचकपाल इति तत्पुरुषे पंचकपाला यस्या
सौ पंचकपालः इति बहुव्रीहौ पंच च कपालाश्च पंचकपालाः पंचकपालमिति द्वंद्वे एतेनाव्ययीभावबहुव्रीहि
भिन्नत्वे निवेशनिर्दोषतासमर्थनं प्रत्युक्तं अवच्छेदकघटनाया आवश्यकतया तत्र तत्र निवेशस्यापरिहार्य
त्वात् कर्मधारयादिपंचकभेदनिवेशेन तद्धितसमासत्वस्य लक्षणतासंभवात् प्रयासवैफल्यमतीवप्र
याकरं पूर्वपदप्रकृत्यर्थाभिन्नत्वेनोत्तरपदार्थबोधकत्वपर्यवसाननिवेशने द्वंद्वतत्पुरुषयोर्वारणेन कथंचि
दुक्तत्वेनापि न संभवति एकादशाक्षरीत्यादौ पूर्वपदस्य वाक्यतयाऽप्रसिद्धेरव्याप्तेरपरीहारात् यद्वा त्रिक
ह त्रिभुवनादीनां कर्मधारयत्वमुक्तं तन्न युक्तं त्रीणि करणि श्रीणि भुवनानीति विग्रहे कर्मधारये योग्यता
देकवचनाद्यनुपपत्तेरिति बहुवचनान्ततापत्तेः चतुर्वर्गेत्यत्र षष्ठीतत्पुरुषधर्मादीनां वर्गश्चतुष्टयस्या
विवक्षितत्वात् एवं चातिप्रसंगाभावाय संख्यादिपूर्वपदघटितत्वाद्यवच्छिन्नपूर्वपदलक्षणाया आवश्यकतया त्रिक
रूपस्य तिष्ठद्गुशिलक्षणाधिगमस्तुल्यत्वेति सोऽयं द्विगुस्त्रिविधः तद्धितार्थोत्तरपदसमाहारभेदात् तत्र तद्धितार्थ
विशेष्यकबोधानुकूलो द्विगुस्तद्धितार्थद्विगुः पंचकपालः संस्कृतः पंचभिः कपालाधिकरणकसंस्कारक
मेरुः प्रतीयते तद्धितार्थसंस्कृतैकदेशसंस्कारविशेष्यकतादृशकपालाधिकरणकत्वबोधानुकूलत्वं पंचक

त्वनिवेशासंभवाच्च किंच पंचकपालादिबहुव्रीहावतिव्याप्तिलक्षणीनेपि बोधे पूर्वपदप्राकार्थस्य पंचत्वावच्छि
न्नबोधानुपपत्तेः भेदसंबंधेन प्रकारतया भासमानत्वात् अन्यपदार्थ हितार्थ द्विगोनोत्तरपदलक्षणायां पंचकपालःस्ता
दौल्यमस्यक्रमादेः स्वरूपेण संस्कृतादिहितार्थे भानसंभवेनाप्रयोजकत्वात् न च संस्कृतार्थस्य तद्धितप्रति
संधानेन भानसंभवेपि विग्रहानंतर्गतसमस्तार्थलक्षणाव्युत्पत्तीतिवाच्यं समस्यार्थस्यापि तद्धितार्थत्वात् न त्वे
तयैकार्थवतानुशासनेन तथैव प्रतिपादनात् पंचतामितित्वादौ सात्तानहितस्यतानेनैव तदंशे भानमिति न
लक्षणापंकागंधोपि समासाद्धारहितावपि न लक्षणा समासाद्धारे भानानंगीकारात् अन्यथा पंचमूलीत्यादिन नीत्यादेरप्रामा
ण्यापत्तेः समासाद्धारण्यच्छेदनासंभवात् न च समासाद्धारबोधने एकवचनानुपपत्तिः एकत्वानो बहुत्वादिति वाच्यं द्विगु
रेकवचनमित्यनुशासनेनैकत्वेनार्थनानात्वेप्येकवचनस्य साधुतोपपत्तेरथैकोपि दारादिभावुवचनस्येव एवं च स्व
घोत्वमपि स्वशक्यत्वरूपं निवेशनीयं पंचकपालादिबहुव्रीहावुत्तरपदस्थलादितिकत्वपानतत्रातिप्रसंगः निवेन्द्रे
नद्वैवीर्यं लक्षणादिकमप्रतिसंधानस्यान्यथोपपादये न तत्र संधानस्यान्यथासिद्धाः प्रयोजकत्वात् अन्यथा
लक्षणाविभक्तिप्रतिसंधानेन समासात् बोधे समासार्थानेन किमपराद्धं द्विगौ रज्जुशासनो लिखितन समासाद्धारबोधकत्वे
मध्य निवाच्यं प्रत्येकपदार्थोपकल्पत्वात् परंपरया हितस्य समासम्य धातुशक्यत्वात् अधिकमग्रे स्फुटीभविष्यति
र्थे स्वशक्यतावच्छेदकस्य लाघवात् स्वनिवेशनेनापि द्विगौ तद्बहुव्रीहिवारणमशक्यं कपालपदं लक्षणापिनोलत्वायाश्रयेक (
देशो कपालेकपालपदशक्यत्वानपायात् न च स्वशक्तिप्रतिसंधानाधीनोपस्थितिप्रयोज्यत्वेन पूर्वपदशक्यार्थस्य (
कारता निरूपितविशेष्यतो विशिष्टवारणीयो दोषः तन्निवाच्यं पंचनीलोत्प[illegible]लीत्यादावप्रेतनत्तरपदस्य वाक्य

मद्र
प्रभा
धृ॰
१६५

प्रसंगवारणं स्वसंपाद्यमिति वाच्यं तत्रेत्यपि कारीयतद्धितार्थतायाः अधिकरणत्वे अनपायादिति शंका नेव कं न।
घाधिप्रमादात् द्विगुभिन्नत्वं निवेशनीयमिति दोषः पञ्चसु तत्पुरुषद्विगोरप्यभेदो निवेशनीयः संस्कृताघृतत्व
दकेतत्रौकारीयताति प्रसक्तेरप्रत्यूहत्वात् एवं च तडभयभिन्नद्विगुत्वमेव लक्षणमिति यद्यप्यवैयर्थ्यात् अनिवेश
नीयत्वात् यद्धातद्धितार्थविशेष्यकबोधजनकत्वानुशासनबोधितत्वं लक्षणं वा कां तत्र रसंतात् टपबोधजनक
बोधितत्वेनानुशासनाबोधितत्वात् अतिप्रसंगः नवापमारितद्धितार्थः प्रत्ययादिप्रकृत्यर्थस्य प्रकारतया भानेन त
द्धाविधबोधजनकतयानुशासनबोधितत्वात् सर्वत्र तद्धितप्रकृत्यावतिप्रसंगः समासत्वनिवेशेप्युपस्थाद्विवारणम
शक्यं द्विगुत्वनिवेशेपि पंचपूल्यादिलोपितस्येदमित्याद्यर्थकतद्धितोत्पत्तेरप्रत्यूहत्वेति प्रसंगः संस्कृताघृतरपदके
उत्तरपदद्विगावपि तथा पंचकपालादावुत्तरपदलक्षणपदैः प्रगाभयेन तद्धितबोधाधीनोपस्थितिप्रयोज्य ५८
त्वेन विशेष्यतया निवेशापित्तमशकत्वादिति वाच्यं तद्धितार्थतावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छि
नाधेयत्वप्रकारतानिरूपितविशेष्यतावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छिन्ननिरूपकत्वप्रकारतानि
रूपितविशेष्यतावच्छिन्नबोधतावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छिन्नजनकतानावच्छिन्नप्रकार
तानिरूपितानुशासनाधीनबोधविशेष्यतायाः निवेश्यत्वात् तद्धितार्थे द्विगुरिति वाक्यतत्तद्धितार्थेहत्तिवि
शेष्यतानिरूपकबोधजनकद्विगुरिति बोधोत्पत्ताताद्दशविशेष्यतापंचकपालादितद्धितार्थद्विगावव्याप्तिवंतरे धा
नताद्दशीविशेष्यतादर्शितरीत्यातद्धितार्थविशेष्यकस्वार्थबोधानुकूलत्वस्यैव तादृशानुशासनस्य तत्प्रता
त्ययविरहेणानुशासनाधीनताद्दशधीविषयतायालक्षणत्वात् तात्पर्यभ्रमेणतज्ज्ञापिताद्दशधीविषयता

पालादावबाधितं नचैतत्पदस्य तत्पूर्वकरणकसंस्कारकर्मोद्देश्यत्वलक्षणायां तत्रापि तिविधादेशादानहितस्थले
ततद्बोधादेवतस्थापत्यादिमाननिमित्तेके सर्वत्र तर्हि तस्यैतवनहितलोपस्थले तद्दृष्टं हित्वघ्नेमानं लोपमज्ञान
नस्तुनतलोर्षबोधः एवंचतद्धितबोधार्थीनोपस्थितिप्रयोजनं तद्धि स्वार्थप्रकारतानिरूपिततनतद्धितार्थविशेष्य
तापांलुमालुमतद्धितस्थलयोः साधारणमिमितकानन्नपरिष्टत्वयायितोमम्मतेतेषां राजप्रकृत्याद्योलुग्मव
षादिसस्त्वाराजसंबंधादिमानमतंउपस्कृतलोपमज्ञानतोबोधापत्तावस्यसमानतादिति चिंतनीयं यत्तु पं
चसुमत्कपालेषुसंस्कृतः पंचसुकपालेष्वित्यादौ मत्कपालादेकतरपदस्यवाच्यतयाश्रुतमावात्कुकर्मसंबंध
रूपालक्षणापि नसंभवतीतिसर्वैमतंकेचिदाहुस्तच्चिन्त्यं उत्तरपदैकदेशस्य कपालपदादेर्लक्षणायाः स
माधानसंभवात बहुव्रीहिकर्मधारयविंदेकदेशान्वयानुपगमेपदांतरस्यतात्पर्यग्राहकतायाकारेपि च
निविरहात मनत्रयेप्यसद्दोषलक्षणातद्धितार्थविशेष्यकस्वार्थप्रकारकबोधजनकत्वतया पंचकपालादेव
व्याहत उत्तरपदलक्षणायापि संस्कृतादेस्तद्धितार्थानपायात यद्यपि पंचसुकपालेषुसंस्कृत इत्यादिवाक्ये
प्रमस्तत्वप्रकारकोपमापि तत्पदघटकतद्धितार्थतानपायेन तद्विशेष्यकबोधाजनकत्वे प्रमसंस्कारजन्यतिप्रसक्तेर्हि तु
तनैवेशेनवारणेपि पंचसुत्वलीसंस्कृतापंचसुत्वान्नकृतमितारिवाक्येप्यघटादितद्धितार्थसंस्कृतादिविशेष्यक
बोधोत्पत्त्या समाहारद्विगावतिप्रसंगः नचविभक्त्यर्थाधिकरणत्वादेपंचसुत्वलाघवत्वयान्वसंस्कृताद्यर्थविशेष्यक
बोधाजनकत्वमुक्तवाक्यानां संस्कृताद्यर्थेविभक्त्यर्थाधिकरणत्वादिप्रकारकबोधाजनकत्वस्यत्वेपिसोपपत्त्या
प्रकारता निरूपितत्वेन स्वघटकोपस्थाप्यप्रकारतानिरूपितत्वेन वा तद्धितार्थविशेष्यतायाविशेषणीयत्वे वाप्ति

महा
प्र भा
१६६

गुणिवद् द्विगुत्वमिति लक्षणस्य दर्शितं विभाजकत्वं यदुदितेत्यस्य कृत्स्नोपसंग्रह इति बोध्यं पूर्वपदार्थप्रधानत्वादिप्रवा
दोपि पूर्वोत्तरपदार्थान्वयभानोपगमपरो बोध्यः पथेन तु समासस्य विशिष्टार्थकत्वात्ततो विप्रसमासे तेः परिस्थाने
ति ध्वनितपरस्य तु पूर्वपदार्थप्रधानसमासे कृत्स्नपदलक्षणं सिद्धान्तयत्नमुपकुंभमित्यादिना यत्नेनार्धपिप्पल्यादेस्तत्पुरु
षत्वयत्नप्रसंगे पि लक्षणया प्राग्गौबोध्यपादिनत्वाद्द्विदन्तमुपादानेन न कृत्किमप्रसक्तिरित्युक्तिः प्रभुकादर्शितप्र
वादानुरोधेन समासेषु तिपदत्वप्रतिदेशपदरत्नयाप्युनरुक्तत्वमुक्तेः पूर्वपदार्थप्रधानकसमाससमाधेः प्रधान
मिधानादिति ध्येयं तत्संबंधिनि कुंभपिप्पल्यादिपरपदशक्यार्थसंबंधिनि पूर्वपदार्थप्रधानत्वमेति उपार्थादि
पूर्वपदशक्यार्थविशेष्यत्वेत्यर्थः निरूपकत्वं तत्तीयार्थेोऽन्वयबोधान्वयी कुंभसंबंधमिति समीपं पिप्पली
संबंधमिवमर्धमित्याद्याकारकोऽत्रान्वयबोधः यत्तु सामीप्यमुपपदार्थेन समीपं कुंभसंबंधमिति सामीप्यमि
वान्वयधीः लक्षणया समीपसाधिभवनिबोधस्तत्रोपपदस्य सामीप्यशक्तस्य धर्मिलक्षणेनोरीक्रियते पर
इ पलक्षणपांगौरवात किं तु कुंभपदस्यैव कुंभसमीपलादिकमुपपदं लक्षणग्राहकमित्यवितव्यमिति तन्नवात
व्ययविभक्तिसमीपेत्यादिना समीपार्थकस्यैवाव्ययस्य समासानुशासनेन सामीप्यार्थकतायाः प्रसक्तत्वात् उ
भयपदलक्षणापेक्षया गौरवाभिधानस्याविचारनिबंधनत्वादेकपदस्य लक्षणावच्छेदकं प्रकृतरसम्यक्तात्
पर्यग्राहकत्वमंगीकृत्यो भयपदलक्षणा यत्ने नतो गौरवमभिधातुं शक्यं प्रातिपदिकार्थयोरभेदान्वयभावप्र
युक्तौ निपातातिरिक्तत्वप्रवेशेन तद्विरोधात् कुंभपदशक्यार्थस्य सामीप्ये पूर्वपदार्थतावच्छेदके समीपपदवा
त्यें भेदान्वयसंभवादुपकुंभादावुत्तरपदलक्षणानावश्यकीति विभावनीयम् अव्ययीभावोपक्रमे कुंभादि

संभवेपिस्वसमभिव्याहृतनामार्थस्याधीनत्वेनतात्पर्यस्यमानधीनत्वेनवातात्पर्यविषयोविशेषणीयतयानकाचित
[illegible]दनिरितरत्रतत्नहिततमकत्वोपसंख्यानेवेदानींदुर्लभातत्द्धितार्थप्रसक्तौतन्माभावेनानुशासनविरहात्तात्पर्यविषय न२
तायाः कथमपितत्रसंभावयितुमशक्यत्वात् एतेनदर्शितसामान्यलक्षणोपलक्षणतावच्छेदकविशेषणतायांदकम
कारत्वापत्तद्धितार्थविशेष्यतानिरूपितत्वंनिवेश्यतद्धितार्थद्विगुलक्षणनिर्वचनेसमासोत्तरादेवारणसंभवे
पिद्विगवत्वंनवारणमशक्यंसंस्कृतापन्नरूपदकद्विगोरात्मदेशाप्तनरूपदार्थस्यतद्धितार्थत्वेनतद्विशेष्यकबोधजनक
त्वादित्यनुशासनबोधितत्वात् समाहारस्यसमूहार्थकतद्धितार्थत्वानपायेनसुतरांतथैवनिरुक्तंतद्धितार्थत्वा
यंतमोवेनानुशासनबोधितत्वाभावादर्शितविशेष्यतानामकलक्षणातिप्रसंगात् उत्तरपदद्विगुत्वेनोत्तरपदस्य
रकद्विगुत्वंपदोत्तरस्वंवर्तितेसतिद्विगुत्वपर्यवसितं पंचपूलीपंचकपालादेरुपपदोत्तरस्ववर्तितयाप्रयोगणाति
प्रसंगात् अन्यपदसमासांतरघटकद्विगुत्वमपितथापंचकपालचरुः पंचपूलीधनइत्यादावतिप्रसंगात् किंच
उत्तरपदपरकत्वेनानुशासनबोधितत्वंउत्तरपदेसंख्याशब्दपदकःसमानाधिकरणसमासोद्विगुरित्यनुशासनेनना
मर्थेविवक्षितःपंचगवधनादौतन्नतःपंचगवादिरेवबोध्यतेइतिनातिप्रसंगोपरिष्कारः पूर्ववदवबोध्यः
समाहारद्विगुत्वंनसमाहाररूपतत्पुरुषकद्विगुत्वंकपालादिसमाहारत्वात्पिकर्कपालादिपदेन
बोधितेपंचकपालादिनतद्धितार्थद्विगोःसमाहारत्वात्पिककोपदद्वयात्तपंचगवधनादौतगतेपंचगवात्म
तरपदद्विगोर्वानिप्रसंगात् किंतु समाहारविशेष्यकबोधजनकत्वात्त्वानुशासनबोधितद्विगुत्वंपरिष्कारः
र्वचन् यथाचसमाहारद्विगोःसमाहारविशेष्यकबोधोपपादकत्वेनोपपादितेप्राक् तेनतद्धितार्थोत्तरपदद्वि

गदा
व्युत्प
६१

कुंभादेरितिवाच्यं स्वरूपसमानयोपकुंभंवर्त्ततेपरस्मान्येमादिवाक्याधीनसमूहालंबनबोधस्यपदादिस्मृतित्व
हशाविषयतानिरूपकस्यजनकतादिकमादायप्रसंगस्मात्तद्वारणाय नचतादृशविशेष्यतायांस्वबोध्यार्थनिष्ठ
त्वनिवेशएवसरणीयांदोषइतिवाच्यंस्वबोध्यत्वंहिस्वजन्यबोधविषयत्वंतच्चतादृशसमूहालंबनबोधमादाय
पीतरेष्वपिवाच्यंस्वप्रतिसंधानजन्योपस्थितिप्रयोज्यविषयताश्रयत्वाद्यर्थकत्वात्तन्निवेशेपिकुंभसमीपमानयो
पकुंभमानयेत्यादिवाक्याधीनबोधमादायदोषः तादृशबोधनिरूपितायाकुंभसमीपशब्दप्रयोज्यतादृशविवि
शेष्यतायास्तत्पकुंभशब्दप्रतिसंधानजन्योपस्थितिप्रयोज्यविषयताश्रयत्वनियमात् एकैकव्यक्ति
विश्रान्तायाश्चैकस्यपदेनवर्णसमुदायात्मकशक्तिपरिकल्पनाशक्यत्वात् नचविभक्तिप्रतिसंधानजन्योप
स्थितिप्रयोज्यसंख्याविभाजकधर्मावच्छिन्नप्रकारतानिरूपितविशेष्यताप्रयोजकतानवच्छेदकत्वावच्छिन्नवि
षयताकानुपूर्वीमत्त्वंनिवेशनीयंतस्मादीनामुपकुंभादीनांचानुपूर्व्याः स्वपदेनोपादानेप्राकरणाद्दोषइतिवाच्यं
निर्मक्षिकायव्ययीभावानुपूर्वीणांतादृशत्वानवग्रहणादितिचेत्तस्मादीनांचविभक्त्यर्थसंख्याप्रकारतार्थबो
धकत्वाभावात्तादृशानवच्छेदकत्वेदोषलभेनाव्याप्त्यापत्तेः तादृशप्रकारतानिरूपितान्यविशेष्यताप्रयोजक
तावच्छेदकत्वनिवेशेतुतादृशाव्ययीभावाधीनबोधविशेष्यतायामलक्ष्याविधायाः प्रयोजकतावच्छेदके
ताप्रसिद्धायथलक्षणासमन्वयसंभवेनाव्याप्तिवारणेपितादृशप्रयोजकतावच्छेदकतावत्यालक्ष्यापनानुपूर्व्याः स
माननानुपूर्वीकततप्रयोगादिसाधारण्येनातिप्रसंगोदुर्वारइतिचेदुच्यते स्वपदप्रतिसंधानजन्योपस्थितिप्रयोज्य
संख्याविभाजकधर्मावच्छिन्नप्रकारतानिरूपितविशेष्यताप्रयोजकतावच्छेदकत्वावच्छिन्नविषयताविशि
नो ।

नित्यसमासे विभक्त्यापि कारीयत्वाभावादतो नित्यसमासस्थलपदमेव प्रयुज्यते समीपं कुम्भस्येत्यादिकं कुम्भसमीपे।
नित्यपदविग्रहोऽसाधुरेवोपकुम्भे विभक्त्यन्तरान्तार्थस्य निराकांक्षत्वादिति तिङ्क्वांतरगतिः पारेगंगमित्यादौ तु वि
भाषाधिकारीयत्वात् स्वपदविग्रहो भवत्येव साधुर्गंगायाः पारमित्यादिः तत्र गंगायाः पदे गंगासंबंधि लक्षकं नाद
प्रासंबंधिनः पूर्वपदार्थे भेदान्वयः लक्षणेनाव्ययीभावस्याव्ययत्वे सति समासत्वे नीलोत्पलादीनामनव्यय
त्वात्वरादीनां समासत्वाद्युदासः अव्ययीभावश्चेत्यनुशिष्टमव्ययीभावस्याव्ययत्वं अत एवानव्ययोऽव्य
यो भवतीत्यव्ययीभाव इति व्युत्पत्तिरपि साधुसंगच्छते उपकुंभादेरव्ययावयवकस्यापि समुदितस्यानव्ययस्या
नुप्रासनेनाव्ययीकरणात् अर्थस्यानव्ययत्वस्यैकाव्ययभवनमस्य लक्षणेऽनुपयोगादनिवेशः दकमव
यवं स्ववर्थसाम्यान्वयबोधकप्रातिपदिकत्वं एवमुपकुम्भमित्यादितः प्रातिपदिकान्तरार्थमुख्यान्वयि
कुंभसमीपादेर्बोधादप्रसंगमंगायप्तवर्थेति विभक्त्यर्थैकत्वानां स्वरूपपकुंभमत्वादित्ति तिङ्ग्येकत्वादेरव
यार्थे विभानेनाप्रसंगात्स्यागात् अर्थैकमात्रार्थत्वेति एकत्वमेकत्वत्वेन सुवेकवचनार्थो भवत्येवेति दर्शिता
प्रसंगोऽद्वीरः एवं समीपमित्यादौ पदेवसमीपसूत्रे नैकत्वे नैवभासनेनतरे वोपकुंभादेरव्ययत्वोपमित्वेनापि
नाऽशैकत्वान्वयार्थबोधकत्वेऽपि नवसूपप्रतिसंधानजन्यार्थोपस्थितिप्रयोज्यस्य विभाजकधर्माव
च्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपकबोधाजनकत्वस्यापि व्यावर्णीयत्वादस्येषः एकपदनिङ्पदादेः
एकत्वबोधस्तदीयैकत्वप्रकारतायां सुप्प्रतिसंधानजन्योपस्थितिप्रयोज्यत्वाप्रत्वात् यत्तु समीपादिपदाद्वुपकुं
भापर्थस्य बोधस्तदीयैकत्वप्रकारतायां नोऽशप्रयोज्यताप्रतीतिनिरूपितविशेष्यतानिरूपकबोधाजनकत्वाद्य

महा
भा
प्र.
९८८

नेमादिरूपभेदादनयाद्वचनेष्विति एकत्वादिसंख्यास्वबोधकतया वर्तमानं यत्र क्वेतिबाध्यमस्वप्रकृतिकविभक्त्यर्थे
संख्यासंख्याया भेदेन रूपभेदेन लभन्त इत्यर्थः एतत्फलितं सर्वाव्ययसाधारणं लक्षणं वर्णितं केचित्तु विभक्तिषित्यस्य
कारकेष्वित्यर्थः पुंस्त्वादिषु कर्मत्वादिषु एकत्वादिषु चाबोधकतया वर्तमानं सदृशमेव न नत्वप्येति नानाभावाश्रुतिसत्व
धर्मान्तरं स्पृशन्तीत्यर्थः अव्ययीभावस्यानुप्रासनसिद्धलिंगविशेषेणाकारकेण च विशिष्टस्यार्थस्य बोधकत्वेऽपि संख्या
विशिष्टार्थबोधकत्वादव्ययत्वमितिव्याचक्षते तत्र सत्वधर्मानिति सत्वलिंगाद्यन्वयीयद्यत्वर्थं लक्षधर्मालि
गादयस्तानननाद्ध्याप्नुवन्ति न गृह्णन्ति न बोधयन्तीति यावत् एतेन लिंगाद्येकत्वान्वितार्थानभिधायकत्वेऽव्यया
नामेकवचनमात्रं तत्र यापि प्रयोगसाधुत्वानिर्वाहाय द्वयेकयोर्द्विवचनैकवचने बहुषु बहुवचनमिति पाणिनिसूत्रा
एवि पर्ययमसमभिसंदधानेनेदमनिबद्धं क्रियते इत्यादिकमभिदधानेनाविष्कृतमेवाव्ययानां विभक्त्यर्थसंख्यान्विता
र्थबोधकत्वं वर्णयन्ति दिनदमभिप्रायं एकवचनमित्येको योगः कर्तव्यो नैकत्वाभिधाने संख्यासामान्याभिधाने ए
कवचनं स्यादिति द्विवचनो द्विवचनबहुवचने इत्यन्तः द्वित्वबहुत्वयोः सामान्ययोगलभ्यमयेकवचनसंनेके व्याख्येन
पत्येकमेवाद्यर्थन्तु शिष्टानां द्वितीयादीनां कर्मत्वाद्यन्वितार्थाबोधकेभ्यः अव्ययेभ्यः कथमस्तु यपत्तिः स्यादितिशं
कापि परिहृता एकवचनमितिसामान्यविधेः संख्याकर्माद्यविषयकान्तउपपत्तेरित्यभियुक्ताः यद्यप्युक्तन्याय
यमव्ययेष्वव्ययपदेन तथापि वर्णिताविज्ञानमिति प्रकरणादवसीयते तथापि प्रणवविधोपक्रमात् प्रणवस्याव्यय
नामनयाधंतासंसुभपवर्गवेतानाम् एवं आलोच्य इमेद्वाभाष्यकारादिभिरव्ययलक्षणाभिधाना बुमरे उपम
लमित्यालोचनीयं एतेन ... अव्ययीभावस्यव्ययत्वं ... अव्ययीभावत्वघटितत्वात्संज्ञान्याश्रय

घ्यानुपूर्वीमत्त्वं निवेशनीयं निर्मलिकाद्यवायी भावत्वे विषयतायाललद्व सर्वत्र छिन्नायात्तयाविधिविशे
ष्यताश्रयो जनकमानवच्छेदकतया सामानाधिकरण्यसंसर्गेण तन्निष्ठिताद्यानुपूर्वीमत्वं तन्नावाधितविशि
ष्टमानतिरिक्तत्वेपि विशेषणतावच्छिन्ननिरूपकताकाधिकरणतायामतिरिक्तत्वाभावप्रयुक्ततयावसमाना
नुपूर्वीकत्वस्य कृष्णादौ वाधितत्वमिति नातिप्रसंगः त्वावच्छिन्नप्रकृतिकत्वेन विभक्तिविशेषस्य मनि
वेशापि भवतिनिर्दोषं लक्षणं न च तथापि नैव व्यय इत्यादि समुदायवारणाय तदनुपादेयमेव समासत्ववटकप्राति
पदिकत्वदले यदि चासमीभावाद्यतिरिक्तं पदं सर्व्वं पार्थिवत्वयोर्वद्यमाणयुक्तेः सामान्यविषयकतादिनिष्ठ
कः पंचालदाविभक्तित्वेन वृत्तिविशेषणीयन समस्तेनापि तावच्छिन्नप्रकृतिकत्वेनाप्रयुज्यसमुदायादिवारणाय
५८ समासघटकतया प्रातिपदिकत्वं नूपादेयमेवेति वोध्यं अत्र यानां नाटपासंख्यात्वय निराकाङ्क्षत्वे महाभाष्य
कारादिप्रदिनाबहुवेणसमतोवविधाकृतिः प्रमापयति सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न
व्येति तदव्ययमिति त्रिषु लिंगेषु सर्वासु त्रिषु स्वार्थबोधकत्वानामसंसर्गेण वर्तमानेषु समानेषु सामान्यतात्पर्यं पाव
छिन्नवृत्तितावत्वेन कस्यापि लिंगस्य न साकांक्षत्वार्थस्य वा वोधकमिति यावत् नास्ति हि स्वरादीनां प्रकृता
र्थविशिष्टार्थाभिधायकत्वं न चैवं सुखादेरव्ययत्वप्रसंगः तस्मात् सर्वासु विभक्तिषु यन्न व्येति विविधं रूपे
ण नाप्नोति सुखादीनां तुल्यत्वमित्यादि रूपभेदाद्विभक्तिभेदे रूपविधयनिमन्वेति नातिप्रसंगः न चैवं सुपद्यव्ययस्य
यीभावाव्ययकेन प्रत्येक लिंगतायाः अनुशिष्टायाः पदसंस्काराविशेषकत्वेपि साकांक्षविशेषणत्वाहि
पदलिंगनियामकतया चरितार्थतया संभवेन लिंगान्वितार्थवोधकत्वाभावकत्वेपि विभक्तिभेदेनोपपत्तेर्भे

मञ्जू
प्रभा
पृ.
१८९

संधानजन्योपस्थितिप्रयोज्यविशेष्यतासामान्यकसमासत्वसमव्याप्तीभावत्वे उपकुंभदेशस्थेत्यादितोऽसादेशात्मकष
ष्ठीप्रतिसंधानजन्योपस्थितिप्रयोज्यायाः संबंधविशेष्यतायोपस्थाप्यकुंभसमीपप्रकारतानिरूपिततन्निरूपक
बोधस्योदयादव्याप्तिवारणायासादेशान्येति उपदृदिदेशस्थेत्यादितोऽलभ्यषष्ठीप्रतिसंधानजन्योपस्थितिप्रयो
ज्यदृदिसमीपादिप्रकारतानिरूपितसंबंधविशेष्यतानिरूपकबोधजननादव्याप्तिवारणायस्रूयमाणेति उपकुं
भेनेत्यादितः स्रूयमाणतृतीयाद्यर्थविशेष्यकुंभसमीपादिप्रकारकबोधोदयादव्याप्तिवारणायविभक्तिसामान्य
